ORISSAN ORIENTAL TEXT SERIES (SANSKRIT)—13

KEḶI-KALLOḶINĪ

ANĀDI MIŚRA

उत्कलीय-प्राच्यग्रन्थमाला (संस्कृतम्)—१३

अनादिमिश्र-विरचिता

केलिकल्लोलिनी

ओडिशाराज्यपर्य्यटन-सांस्कृतिकव्यापारनिर्द्देशालयसंपादिकया
स्नातकोत्तरोपाधिकया श्रीमत्या प्रमिलामिश्रदेव्या संपादिता

भुवनेश्वरस्थ ओड़िशाराज्यपर्य्यटनसांस्कृतिकव्यापारनिर्द्देशालयेन
प्रकाशिता

प्रथमसंस्करणम्—१९८०
१०००

कटक आलोकप्रभाप्रिण्टर्समुद्रणालये मुद्रिता

मूल्यम्—

ORISSAN ORIENTAL TEXT SERIES (Sanskrit)—13

KEḶI-KALLOḶINĪ

by

ANĀDI MIŚRA

Edited by

Srimati Pramila Mishra, M. A.

Editor

DIRECTORATE OF TOURISM & CULTURAL AFFAIRS
BHUBANESWAR
ORISSA

FORE-WORD

It is my pleasant duty to present this publication of *Keṭikallolinī* to the scholars and academicians of the State as the 13th issue of Orissan Oriental Text Series.

The importance of this publication lies not only in the fact that it brings forth a lesser known literary work in sanskrit which was long since hidden in the shades of palm-leaves but it reveals the literary, social and religious trends as well as fills up a blank in the history of ancient Orissa.

I hope, the present edition will draw the attention of the concerned readers by which the efforts of the editor *Smt. Misra* will be rewarded.

23-3-81
Bhubaneswar

P. C. Panda
Director, Tourism, Sports & Culture

INTRODUCTION

Keḷikalloḷīni of poet *Anādi Miśra*, as the name signifies, is a beautiful classical Sanskrit *kāvya* in which the romantic theme of the amours of *Rādhā* and *Kṛṣṇa* has been presented in five tarangas. This edition is based on a single palm-leaf manuscript preserved in the Manuscript Section of the Orissa State Museum, Bhubaneswar.

DESCRIPTION OF THE MANUSCRIPT:

The manuscript bearing the Cat. No. L/319 contains one hundred and eleven folios in total. The size of each folio is 38 c. m. × 3 c. m. . Each side of the folio has on it two to three lines in Oriya character. The manuscript has been acquired from *Sri Narasimha Miśra* of *Gada Māṇitri* under Begunia Police Station in the district of Puri. It is in good condition and the handwriting is quite clear.

This manuscript contains another important work named *Rāsagosthi Rūpakam* of the same poet *Anādi Miśra*, but it has been scribed by some other person as is clear form the different handwriting and the colophon.[1] Its pages have also been separately numbered. Out of one hundred and eleven folios of the whole manuscript the text of *Keḷikalloḷīni* covers nintyfive folios and latter consists of fourteen. The last two folios contain certain irrelevant writings in very unsystematic manner.

The following colophon is found at the end of the text of *Keḷikalloḷinī*—

केलिकल्लोलिनीनामकाव्यं कृतमनादिना ।
दोषं हित्वा गुणं मत्वा सुशीलाः परिशील्यताम् ॥

---

1. चिन्तामणि त्रिपाठीना लिखितमिदं रूपकं समाप्तम्। × × ×

The text has got certain commentaries at places in the manuscript, perhaps prepared by the scribe himself and these have been indicated in the foot notes of this edition.

THE POET

The poet *Anādi* has mentioned his identity in the last verse of each *taraṇga* in the following words—

"पातिव्रत्यसुधासरित्प्रसरभूः श्रीनिम्बदेवी गिरां
जीवातोर्यमजीजनज्जनमतं श्रीमच्छतंजीवतः ।
तेनेराभिरनादिना विरचिता या केलिकल्लोलिनी × × ×"

This shows that *Sri Nimbadevī* was poet's mother who was extremely devoted to her husband. *Śatanjīva* was his father who was also very much popular as a scholar of that age. Except this nothing more has been stated by the poet in this *Kāvya*.

But two more works named *Maṇimāḷā Nātikā* and *Rāsagoṣthi Rupakam* written by the poet *Anādi* have been found. *Maṇimāḷā Nātikā* is a drama in four acts based on a fictitious story reflecting the religious faith and literary trends of the contemporary society. It is based on a romantic episode relating to the union of *Śṛṅgāra Śṛṅga*, the prince of *Ujjayinī* and *Maṇimāḷā*, the beautiful princess of Puskara island. The drama was staged on the occasion of the Autumn festival of Goddess *Durgā*. A lot of information has been given by the poet regarding himself and his family in the begining of the said work[1]

---

1. श्रीमन्मुकुन्दाभिधो भाग्यसिन्धोर्जातः शतंजीवनवीनचन्द्र :
तस्यावदातस्य शरीरजन्मा विराजते कश्चिदनादिनामा ।
श्रीनिम्बदेवीर्दिविषल्लतायाः श्रेयं फलं साधुषु साधु नम्रः ।
वाचो विलासैः स.कविः करोति सूक्तं न कं पायसपारणाय ।

× × × तर्हि यदूर्ध्ववंशीयो विद्यानगरविद्यागरिमग्रावटङ्कस्तत्र भवान् श्रीदिवाकरकविचन्द्ररायो गद्यपद्यविरचनेरद्यापि विजयते । × × × तदेव तत्प्रतिभाप्रभावप्रभवप्रभावती नाम नाटकरसोर्मिभूममग्नाः पुरा वयमभूम । तच्छङ्के तदन्वयानुकीर्त्तनादस्मत्प्रीतिपक्षपातदाक्षदीक्षाऽद्धे तवादवादीन्द्रचन्द्रेण भवता किमपि रूपकं निरूप्य समोदसम्पदास्पदी भविष्यामः । × × स च कविः श्रीमदुत्कलेश्वरपादपङ्कजोपजीविराजसमाजमौलिमाल्येन श्री नारायणमङ्गराजेन प्रयुज्यमानेन मया 'मणिमाला' नाम नाटिका कृता × × ।

from which it is learnt that the poet was born in the renowned Brahmin family of *Kavichandra Rāya Divākara Miśra* of Utkal who bore the famous *Bhāradvāja gotra*. *Mukunda* and *Śatanjīva* were his grand father and father respectively and *Nimbadevi* was his mother. The father *Satanjīva* had composed a *Gītikāvya* named *Mudita Mādhava*. Our poet *Anādi* was very much inspired by the various talented writings of his famous ancestor *Kavichandra Divākara Miśra* who was highly honoured by the king of *Vidyānagar* for his profound scholarship. Thus he composed *Maṇimāḷā Nāṭikā* being greatly influenced by the drama *Prabhāvati* written by *Kavichandra* and persuaded by the honourable king *Nārāyaṇa Maṅgarāja*.

Rāsagoṣṭhī Rūpakam is also a short play in one act depicting the *Rāsa* dance of *Śrīkṛṣṇa* with the *Gopīs* on a full-moon night in the Autumn season. The author *Anādi* has mentioned in its prologue[1] that he has composed the drama at the request of king *Vanamāḷi Jagaddeva* of *Khaṇḍapallī*.

This shows that poet *Anādi* of *Keḷikalloḷinī* was patronised by two different kings during his life. It is learnt from the history of the *Rāj* family of *Khaṇḍapaḍā*, (the present name of *Khaṇḍapallī*) one of the feudatory states of Orissa[2] that *Nārāyaṇa Maṇgarāja* ruled over the estate in the third generation of the rulers of *Maṅgarāja* dynasty. *Vālunkeśvar Simha Mardarāja* was his son and *Vanamāḷī Simha Mardarāja* was his grandson. Besides this, in *Kṛṣṇa Kaḷpalatā*,[3] an unpublished Oriya *Kāvya*, written by *Naṭabara Bhramarabara Mardarāja*, another king of this *Khaṇḍapaḍā*, the names of king *Nārāyaṇa* and his grandson *Vanamāḷī* are mentioned.[4]

---

1. श्रीखण्डपल्लीपुरीचन्द्रमण्डलिचन्द्रिकोद्गमेन समस्तराजसमाजनानामणिगणविशुद्धब्रह्मलक्षणहीरकेण भाग्यसौभाग्यनिर्भर-भागीरथी भवद्भगवद्भक्तिना वनमालिजगद्देवेन प्रेरितेन श्रीमदनादिकविना विरचितं श्री रासगोष्ठीनाम रूपकम ।
2. List of Title-holders published by the Government of Bengal, Page 112.
3. The Mss. of *Kṛṣṇa-kalpalatā* is preserved in the Mss. Section of the O. S. M.
4. पहिले खण्डपत्तनरे रहिले यदुनाथ मङ्गराज × × ताङ्क सुत नारायण सङ्गीतशास्त्रे रञ्जित ये कले सुसङ्गीत नारायण । × × तनय वालुङ्केश्वर से नरेश्वर स्वनामे नदीपारो वसाइछन्ति ईश्वर × × ताङ्क सूनु वनमाली, सेहि वीर वनमाली, द्विरददन्त उत्पाटने रणरे प्रकाशे प्रतापझलि ।"

In the Life-story of *Sāmanta Chandraśekhara*, a work written by *Paṇḍita Chandraśekhara Miśra* the geneology of the *Khaṇḍapaḍā* Royal family is given in detail from which it is learnt that king *Yadunāth Maṅgarāja* ascended the royal throne of *Khaṇḍapaḍā* in the year 1599 A. D. after the reign of *Raghunātha Narendra*. He ruled for seventy-six years. Then his son *Nārāyaṇa Maṅgarāja* ruled for thirtyfour years and he was a strong vaisnavite. His son *Vālunkeśvara Mardarāja* ruled for Fourteen years after whom the reign of *Vanamāḷi Siṁha Mardarāja Bhramarabara Rāya* began. He got the title of *Mardarāja Bhramarabara Rāya* from the Gajapati of Puri. He was the worshipper of *Lord Gopinātha* and was very strong and stout. He ruled for eleven years.[1]

The name of king *Vanamāḷi Jagaddeva*, as the Chief of *Khaṇḍapaḍā* estate is mentioned in *Śrīkṛṣṇa-Līḷamṛta*[2] of poet *Nityānanda* who composed the *Kāvya* under the patronage of the said king.

Moreover, the reference to king *Nārāyaṇa Maṅgarāja* ruling in the region to the south of the river *Mahānadī* is made in a work named हरिभक्ति सुधाकरः[3] written by one *Dinabandhu Miśra* of *Khaṇḍapaḍā* which has been dedicated to the above mentioned king. Thus it may be concluded that poet *Anādi* was a poet held in esteem in the royal court by three generations of rulers of *Khaṇḍapaḍā* begining from *Nārāyaṇa Maṅgarāja* to his grandson *Vanamāḷi* and he contributed a lot to the field of contemporary Sanskrit literature of Orissa.

---

1. *Sāmanta Chandraśekhara Jībanī*—Revised 7th edition—1972, PP. 18-19.
2. गर्गान्वयोदन्यदुदितशीतधामाभिरामाकृतिरुग्रधामा ।
   श्रीमान्य आसीद्वनमालिनामा नृपोऽर्थकामाधिकदानशौण्डः । १२ ।
   तदीयनामाङ्कितगीतबन्धं कर्त्तुं प्रवर्त्ते रुचिरं प्रबन्धम् ।
   श्रीकृष्णपादाम्बुजभृङ्गगेयं श्रीकृष्णलीलामृतनामधेयम् । १३ । (Canto I Verse 12-13)
3. इह क्षितौ सर्वगुणैरुपेतः सङ्गीतविद्भूरियशाः सुशान्तः ।
   धीरासि विद्यार्णवकर्णधारः विभाति नारायणमङ्गराजः ॥ × × महानदी दक्षिणभूप्रदेशे × ×
   (Canto No. DH/1037, OSM)

The date of composition of the work हरिभक्ति सुधाकरः discussed before was 1610 *Śakābda* or 1688 A. D. as mentioned in the work.[1]

The period of rule of *Nārāyaṇa Maṅgarāja* was from 1675 to 1709 A. D. and of *Vanamāḷi Mardarāja* was from 1723 to 1734 A. D. as is known from several historical and literary evidences available so far. It may be presumed that poet *Anādi* was about 30 years in age when he wrote *Maṇimāḷā Nātikā* to please the king *Nārāyaṇa.* Thus he was long-lived is clear as he could enjoy the patronage of *Nārāyaṇa Maṅgarāja* and of his grand son *Vanamāḷi* under whose rule he wrote *Rāsagoṣthi Rūpakam.* Hence the period of the poet may fairly be fixed between 1650 A. D. and 1734 A. D. .

Nothing is yet known about the contribution of poet *Anādi* during the reign of *Vālunkeśvara Mardarāja,* the son of king *Nārāyaṇa.* Further investigation may reveal some more information regarding this poet held in high honour.

The identity of *Kavichandra Rāya Divākara Miśra,* the revered ancestor of *Anādi* is already established in the history of Sanskrit literature of Orissa. He flourished in the court of *Gajapati Pratāprudra Deva* (1496-1534 A. D.), the Emperor of Orissa. He was the author of a great number of sanskrit works both in prose and poetry including the famous "*Bhāratāmṛta Mahakāvyaṁ.*"

Thus it may be concluded that the poet *Anādi* was the descendant of a highly cultured and reputed family and got ample oppertunity to manifest his poetic talents in his long life time.

SUMMARY OF THE WORK—

First Taraṅga—

Rādhā entered the beautiful forest of *Vṛndāvan* in the company of her friends. The trees with new tender leaves and laden with

---

1. महानदीदक्षिणभूप्रदेशे देशे तदीयैव सहाशकाब्दे ।
   गते नभश्चन्द्ररसेन्दुसंख्ये विनिर्मितो भक्तिसुधाकरोऽयम् ॥

full-blown flowers like *Kadamba, Vakuḷa, Māḷatī, Tamāḷa, Ketakī, Kunda, Palāsa, Campaka, Navamallikā, Mādhavī* etc., the fresh songs of the cuckoos intoxicated with the honey of the mango blossoms, the cool and perfumed sway of the southern breeze, the loud chanting of the peacocks, the swarms of bees hovering over white kunda flowers, the sweet rippling waters of the river *Yamunā* with its blue lotues contributed to the unique charm of the forest. This enchanting beauty of *Vṛndāvan* entered her heart and she was merged in an ocean of nectar like joy. At the same time at the sight of *Rādhā's* devinely beautiful form all the beautiful aspects of the forest like the flower bunches, the mango fruits, the swarms of bees filling the clustering *Vakuḷa* flowers, the *Maḷaya* wind and the like immediately lost their original charms and their beauty of form and lustre due to a sense of shame. Doubts and misgivings rose in their minds as the inexpressible beauty of *Śrirādhā* surpassed the beauties of all those objects of the forest. All on a sudden *Rādhā* found a lot of resemblances in those objects of *Vṛndāvan* with the various aspects of *Kṛṣṇa*. As a result she became absorbed in *Kṛṣṇa* and *Kāmadeva*, the God of love began to pierce her heart. She was stunned and she became still and silent like a *Yoginī*. The natural emmotional changes caused by her sense of the presence of *Kṛṣṇa* (सात्विका स्था) were reflected in her body. Then she became eager to see and meet her lover *Kṛṣṇa* in his pleasure grove. So she advanced a little and reached the outskrits of *Kṛṣṇa's* bower.

Second Taraṅga—

Seeing the delightful form of *Kṛṣṇa* from a distance *Rādhā* again fell under the powerful rule of cupid. Waves of emotion stirred her slender body. Through pain and shame her eyes were covered by the eye lashes heavy with tears and her lips became pale, her whole body being tormented by the heat of the flames of desire she shivered, lamented loudly and uttered in-drawn sighs repeatedly. The flowers fell down from the glossy hairs of her fillet loosened by the convulsions of emotion.

As her body became extremely emaciated the bright necklace felldown suddenly from her neck. The bangles slipped away from the hands. The girdle in the waist also fell down due to the excessive slenderness of her usual slender waist. Insensitive to everything she could not even feel any cold. She narrated her deep longing for *kṛṣṇa* and sorrow over separation to friend *Laḷitā* in witty words. She upbraided the moon, the Love-god, the *maḷaya* breeze for arousing in her such keen passion. Then all on a sudden she fainted. All the labours of *Laḷitā* to regain her consciousness proved fruitless. But she regained her sense only when she heard the nectar-like words relating to *kṛṣṇa* from the cunning *Laḷitā*. Then *Laḷitā* leaving *Rādhā* at the disposal of cupid's arrow started for *Śrikṛṣṇa* to perform her duty of fulfilling *Rādhā's* desire.

Third Taraṅga :

On her way to *Kṛṣṇa Laḷitā* saw the blossoming lotus cells looking like pots of water, the tender mango leaves, the mango fruits looking like golden balls for the amorous play of *Kāmadeva*, the singing cuckoo, the herds of deer and the beautiful peacocks dancing in joy at the sight of the black clouds and so on. Taking them all as good omens indicating success in her attempt her heart danced with joy. She saw *Śrikṛṣṇa* under the *Mādhavi* grove and first she wished to know his mental state. She stood behind a tree and found *Śrikṛṣṇa* moaning heavily accusing the moon, the cuckoo and the enchanting spring season etc. because of his separation from *Rādhā*. Knowing that to be the most favourable moment *Laḷitā* approached *kṛṣṇa*. *Kṛṣṇa* giving her a worm welcome enquired about the reason which prevented *Rādhā* from coming with *Laḷitā*. The latter narrated in detail the distress of *Rādhā* at his absence and her miseries caused by the mere mention of the name of *kṛṣṇa*. In his reply *kṛṣṇa* also described the depth of his despair before *Laḷitā* and his deep longing for *Rādhā* every moment. Even in sleep and in dreams also *Rādhā* was his only thought.

"Let the amorous play of *Rādhā* and *kṛṣṇa* be the origin (source) of the river of fame of *kāmadeva,* the husband of *Rati*"- declaring thus *Laḷitā* went back to *Rādhā* quickly and amusing her by annointing her with the sandalpaste like message of *kṛṣṇa* composed of his nectar-like words she began to decorate *Rādhā* to make her ready for the union with *kṛṣṇa.* Being decorated and dressed gorgeously with ornaments in different parts of her body *Rādhā* looked extremely beautiful. Then the sun went down. Evening came with all her usual associations. Immediately *Rādhā* started fearlessly for *kṛṣṇa* with her friend. Bearing the image of *kṛṣṇa* in her heart *Rādhā* merged herself in *Kāmadeva's* ocean of valour as she heard the sweet and romantic voice of *kṛṣṇa* near the *keḷikunja* or bower of love.

Forth Taraṅga :

Kṛṣṇa was delighted to see *Rādhā.* He began to drink the nectar dews of the lips of her moon like face like a *cakora* bird. His limbs and different parts of the body became paralysed due to excessive passion. He could look forward to get the desired auspicious fruit of union as his right eye throbbed. The jungling sound of *Rādhā's* braclet invited him for amorous sport. He became more and more excited and atlast fainted while looking at the beauties of *Rādhā's* body. Sprinkling water like golden rays from her body on *Śrikṛṣṇa* for removing his state of unconsciousness *Rādhā* entered into the pleasure grove (*kuñja*). *Kṛṣṇa* held *Rādhā* in his arms, embraced her closely and then they both began to enjoy amorous sports of various kinds to their heart's content.

Fifth Taraṅga :

As the day dawned the river *Yamunā* shining with its wealth of blooming blue clear lotus flowers, the different groves of the forest *Vṛndāvan* adorned with flower-laden trees etc. looked all the more beautiful. *Rādhā* and *Kṛṣṇa* together planned to take to different false excuses to explain to their relatives and friends the cause of their being late in returning from the forest.

REVIEW OF THE *KĀVYA*—

The five *Taraṅgas* of the *Kāvya* have got the following titles-*Rādhā Mādhava-Sandarśana*, *Vārṣabhānavī-Vipralambha*, *ŚriRādhābhisāra*, *Rādhāmādhava-Sambhoga* and *Chaṭitabandhuvarga*. There are one hundred verses in all *taraṅgas* except the third which consists of one hundred and five verses. The theme is popular. The eternally fascinating *Rāsa Līḷa* of *Śri Rādhā and Kṛṣṇa* is depicted in this *Khaṇḍa Kāvya*. There are three characters in the poem, *Rādhā*, her beloved *Kṛṣṇa* and the most faithfull friend *Laḷitā*.

The *kāvya* begins with *Maṅgaḷācaraṇa* or benedictory verse in the form of the prayer to *Gopīpati Śrikṛṣṇa*, the Lord of the *Gopī's* thus—"May the lover of the cowherd women who was shining with the saffron kumkuma powder detached from the pitcher like breasts of *Rādhā*, and whose magnificent feature was glittering all the more in the rays of the setting Sun, who while sorrounded by the beautiful ladies was resembling the moon coming up from the sea and who rested on the *Kaḷpa* tree of *Vṛndāvan* protect you all".[1]

The subject matter and the name of the work are presented in the second verse in a charming way—

"Let this very river of amorous sports (*Keḷikallolinī*) which presents the happy smiles of *Rādhā* and *Kṛṣṇa* caused by the satisfaction of their amorous passion which at the same time exihibits series of tremulous waves of the game of love and which manifests the magnificient lotus tinged by the immense passion of love, shine amidst the sea of the readers who relish its charm."[2]

---

1. श्री राधाकुचकुम्भकुङ्कमरजोराजोविराजत्तया,
सं‌ध्यादीधितिसान्द्रसुन्दरतरं निन्दन्नमन्दं नभः ।
सुस्मेरः स्मरचन्द्रसागरहृदि श्यामादिरामाजने,
वृन्दारण्यवरेण्यकल्पविटपोगोपपतिः पातु वः ॥

2. मदनमुदितराधा कृष्णहासफेना,
विलसितरसलीलोल्लोलकल्लालिनोयम् ।
प्रतिपदमनुरागानल्परागाब्जतुङ्गा,
स्फुरतु रसिकसिन्धौ केलिकल्लालिनीयम् ॥

Starting from the *maṅgaḷācaraṇa* till the end the whole *kāvya* really justifies the declaration of the poet made in the second verse. The entire work is certainly a master-piece depicting the various phases of the *Līḷā Rasa* of *Rādhā* and *Kṛṣṇa*, all the emotions and situations of love—the desire, the hope, the disappointment, the reconciliation, the fruition etc. in a brilliant style. *Rasa*, *Śabda* and *Artha* blended together in extra-ordinary skill endow the *kāvya* with an abiding splendour. It reveals the creative genious, the wide range of imagination, the wonderful mastery over the Sanskrit language and poetics of poet *Anādi* to the fullest extent.

Coming first to the titles of the five *taraṅgas* as already mentioned it is obvious that each of them indicates the dominant theme and sentiment in that *taraṅga*. Each *taraṅga* ends in a novel way by indicating its position in respect of the next or of the previous one. It also repeats the usual homage to the poet's parents and mentions the name of the *kāvya*.[1]

The beautiful and natural descriptions of the garden of *Vṛndāvan* in the spring attended by the scents, the fragrance and the colours of blooming flowers like *ketakī*, *kiṁsuka*, *mādhavī*, *vakuḷa*, *kunda*, *kadamba*, *bandhu* etc. in the first *taraṅga*, the vivid imagery and the lyrical verses expressing the unparrallaled beauty and gracefulness of *Rādhā* appearing like a hoard of jewels preserved in the crystal-basket of the cupid, the account of her dress and decoration in the third *taraṅga*,[2] the charming description of the evening scene, the enchanting picture of the dawn in the forest of *Vṛndāvan* on the bank of river *Yamunā* as also of the bed of full-blown white and blue lotuses shining in the sweet rippling waters in the last *taraṅga*—all make the *Kāvya* a perfect piece of classical poetry illustrating its distinctive features.

---

1 "× × तस्यामेष लसद्रसो व्युपरमं पूर्वस्तरङ्गोऽगमत् । × ×
× × तस्यामेष तरङ्ग आदितरसात् पूर्वानुजः पूर्णताम् × ×
× × तस्यामापादसौ तरङ्गउदितः पूर्त्तिं चतुर्थाग्रजः । × ×
× × तस्यामेष तरङ्ग आदिततरां पूर्त्तिं तृतीयानुजः । × ×
× × तस्या पूर्त्तिमयं तरङ्गउदयद्भङ्गिर्व्यधात् पञ्चमः ॥"

2. From 52nd to 87th and 88th to 100th verses.

The poet has taken special interest in indicating how the external nature reflects the inner shire of the lovers through the lovely and fragrant realm of flowers, the beauty of trees and leaves. In fact the poet finds an analogy of human emotions and feelings in different aspects of nature. All the actions of human life seem to be reflected in nature.[1]

The abundant use of alliterations and rhymes throughout the work which do not destory the beauty of words shows the wonderful mastery of the poet over the Sanskrit language. A few examples may be cited here—

मधुपावलिभिः शवलं प्रवलं
विमलं स्फुटवञ्जुलजालमलम् ।
इयमाकलयज्जलदालियुजो
घनसान्ध्यकरप्रकरस्य धिया ॥ (१/२२)

× × × ×

एणीदृशो वृहदुरोजमनोजराजलीलामहीध्रगुरुगैरिकधारिकात्वम् ।
संसक्तहारभरभारविभक्तरागानुवन्धुरत्नरुचिरञ्जनराजिराप ॥ (३/६३)

× × × ×

प्रथमं सुरतं स्मरकेलिकलालतिकाकलितं कुसुमं लुलितं ।
मिथुनश्च घनस्य रसोर्मिभरैरपरं च परं मुकुलं स्फुटितम् ॥ (८/६६)

The picture drawn by *Śrikṛṣṇa* before *sakhī Laṭitā* in the third *taraṅga* is really brilliant in this regard. *Kṛṣṇa's* pining for *Rādhā* and murmuring to himself have been depicted in a very natural and interesting manner. He abuses the God of love, the bees, the moon-light, the mango and the cuckoo etc. who seem to him to behave like enemies—

1. As for Example—

× × राधा दधार वहुधा वसुधावतंसं
वृन्दावनं कलयितुं किल कौतुकानि। × × ×
समुल्लसद्भिः सुमनः समुच्चयः क्वचिद्विचित्रेन्दुरुचिभ्रमाकरम ।
सुकज्ज्वलच्छायनमालमालया क्वचित्तमःस्तोमधियोविधायकम । × ×
शफरीदृशो मुखसरोजसौरभं प्रतिसंपतत्यलिकुले समाकुले ।
वकुलानि पेतुरतुलानि भूतले त्रपया किमु स्वजनजादनादरात् । × ×
व्याकोषकुन्दकुसुमासमशुक्तिकोषे, संक्रान्तकान्तिधवलीकृतभृङ्गमुक्ताम् ।
संवीक्ष्य हर्षसरणिं सहसा ससार, संसारसारकुतुकामृतसारिणी सा ॥

हा हा करोमि किमहं विदधद्विमोहं
कुप्यन्नसून्नयति कामपरेतराजः ।
कान्तावियोगदहने गहने प्रदह्य ।
मां चर्वितुं प्रज्वलते च वलात्किलायम् ॥
रे क्रूरस्मरगरसागरस्फुटं त्वां
किं वाऽहं तदपवदे विदूनदीनः ।
यद्गाढ़ं तुदसि मनोमनोभवोऽपि
प्रव्यक्तं निजकुतनूजताप्रतीत्यै । × × ×
रे कालकोकिल कलस्वरदग्धवाणैः
कर्णं मदीयमदयं यदलं भिनत्सि ।
स्थाने तदेतदतिकोपकषायदृष्टे—
दुर्दृष्टस्य ते परभृतस्य मधूत्कटस्य ॥ × × ×

Then the entering of *Laḷitā* in a dramatic way after hearing the term '*Laḷitā*' from *kṛṣṇa* during his delirian utterances :—

"हा कान्ता कलयति किं निदानदीनं, मानं मे नय ललिते प्रसादमेनाम् ।
एतेन प्रियविधिवस्नवर्षणेन क्रिणीहि त्वमसुमहामणिं मदीयम् ॥
वैक्लव्यकन्दलितमेतमथ प्रलापं कृष्णस्य सा श्रुतिपुटी मधु साधु कृत्य,
संबोधनादिव शिवेन निजेन नाम्ना कुञ्जान्तराद्वहिरभूत्तरसा तदग्रे ॥"

reflects the poet's felicity of expression and the capacity of blending *Rasa, Śabda* and *Artha* together. The various emotions of *Śri Rādhā* growing out of the pangs of separation from *kṛṣṇa*, the feelings of extreme sorrow normally popularised by the former Sanskrit poets, her love and her delight have been expressed by the poet *Anādi* in such a picturesque poetic style harmonising with the sorrounding beauties of nature that it has become an image of perpetual beauty and suggests not only the poetic skill of *Anādi* but also his intimate knowledge of human heart. *Rādhā* moans—

"किं करोमि सखि हा सुधाकरो दुर्नयं मयि मनाक्करोति किं
नैष किं नु मनुते दयानिधे-नेत्रपांशमाहेमस्य निष्कृपः ।
मन्द एष तुदतु द्रुत मरुत्काल एष कलकोकिलश्च मां
शोचतः सुमनसा हसन्नसौ यज्वराडपि निहन्ति हन्त किम् । × ×
× × विधुर इत्युदितान् पदतः कदाचन चकार रकारविलोपनम् ।
विधिरनुस्मरणाच्चिरवाद्ध्र्वको विधुरयं सकलैः किल ततस्मृतः ॥ × ×

जड़ता स्फुरिता यदा तदा विबुधत्वं विलसेद्विधौ कुतः।
अत एष वितत्य तां क्षणं सततं दाहमयं तनोति नः। × ×
काम निष्करुण किं करोषि रे यद्दहस्यहह मां तवाश्रयम्।
आश्रयाश इति नाम नामतन् क्वाह्नि वह्नि विबुधाद्चोरयः। × ×
धत्ते सदा गतिरसौ सुरसौघभावं धत्से कथं कथय कष्टमितो वयस्ये।
हन्ता सदागतिरसौ रविसौघभावं मध्यातनोति नितरां सखि किं करोमि।"[1]

The verses of *Keḷikallolinī* may be considered equally remarkable for being store-houses of dhvani and various other *aḷaṅkāras* used with extraordinary skill. A few such verses may be cited here—

समुन्मिलति नीरजं विनिमिलत्यथो कैरवं, तदेव जनमाश्वसीरहह संपदि व्यापदि।
इतीव विनिवेदनं सहितवेदनं कुर्वते, चिरं प्रचुरभृङ्क्रियाप्रकरकैतवेनालयः॥"[2]

× × ×

पूर्वं प्रदर्श्य जनतां सदिमानमाशु, गाढं महोमहदथ प्रतिभापयिष्यन्।
सर्वं स्वपादतलसङ्कुलतां प्रयाप्य भास्वान् समेति समयादुदयं क्रमेण।[3] × ×

स मार्गजं मार्गणभद्रमार्गपान्थं हृदाऽमार्गत कार्य्यमार्गम्।
कल्पद्रुमाणां वशगद्रुमाणां वनं सुतानां वनदेवतानाम्।[4] × ×

× × रसिका भ्रमरीरसिकाधरतो नवशोणपयोरुहतो वहतः।
सुखसीधुधुनीलहरीमधुरानपिबद्रसपूरमरन्दभरान्।[5] × ×

× × विलासिन्या वक्त्रं ललितललितं वीक्ष्य कमनः
स्मराचार्य्याः कञ्जाकृतिकनकपात्रं कलशतां।
तदास्यादुच्चुम्बाच्युतवहलताम्बूलद्रवतां
मिषाद्बन्धूकानां पदमिदमुदारं यदजनि।

---

1. Verses—61-94/II *taraṅga*.
2. Verse—81/V *taraṅga*
3. Verse—89/V *taraṅga*.
4. Verse—5/III *taraṅga*.
5. Verse—39/IV *taraṅga*.
6. Verse—89/IV *taraṅga*.

It is a *khaṇḍa kāvya* reflecting the great *Rāsalīḷā* of Lord *Kṛṣṇa* and *Rādhā* covering a few hours in the eternal and perpetual *Rāsalīḷā* of the two who really together are one and the only one-the Almighty or the Supreme power. The poet *Anādi* has expressed the idea in charming words in the fourth and the last *taraṅga*.

स्वयं ब्रह्मरूपावमू ब्रह्ममोदं कथं स्वानुभूतं प्रभूतं विरक्तां ।
इतीवेतरं तं मनोभूविभूत्वे विभाव्यं सुभव्यं दधाते रतोत्कौ (82/IV)
राधाकृष्णौ स्वनित्यस्थलरतकलया नित्यशोऽप्येकरूपौ
संनिर्मायाथ मायाद्भुतगतिविभवात्स्वप्रतिच्छायमूर्त्तिम् ।
सव्याजं वाह्यवृत्तिं कलयितुमतुलां शिश्रियाते पृथक्त्वं ।
किं विश्वाद्यौस्तयोस्तद्विलसति हि तथा सेन्द्रजालोऽपि लोकः (60/V)

The flow of the literature of love of *Rādhā* and *kṛṣṇa* had started in a period much earlier to that of *Jayadeva* and continued till the end of 19th century. The poet flourished in a period when *Vaiṣnavism* had widely spread throughout Orissa. No doubt, the poet has been greatly influenced by all such earlier lyrical works and specially by *Jayadeva's Gitagovindam* the influence of which is clearly felt in all the different aspects of the poem.

The poet has used different types of popular metres like *Indravajrā*, *Vamśasthā*, *Vasantatiḷaka*, *Māḷinī* in different verses of the *Kāvya*. Elaborate metres like *Śardūḷavikrīḍita*, *Sragdharā*, *Māḷabhārīṇī*, *Jabamati* etc. are also used throughout the poem. Taking into consideration the language, the style of presentation and other poetic virtues *Keḷikalloḷinī* may be undoubtedly taken as the latest among *Anādi's* three works available so far.

The *Kāvya* ends also with the *Maṅgaḷācaraṇa* praying for the welfare of the universe through a very lovely conception—

"May listening to this here-say account, he, the enemy of the demon *Mura*, going in the company of his friends, seeing *Rādhā* merged in the deep ponds of emotion, bathing *Laḷitā* in a wave of smile, sweetly and secretly kissing that beautiful lady rendered senseless (in her depth of passion) at the edge of her ear with a series of questions, how is it how is it, protect the people of the world.[1]

EDITORIAL NOTES—

Acknowledgement is due to the persons who are associated in various stages of editing and publication of this edition. The manuscript of '*Keḷikalloḷī*' was taken up for editing and publication under the able suggestion of *Paṇdit Niḷamanī Miśra*, Curator, Mss. Section, Orissa State Museum. The entire text has been edited under the supervision and guidance of *Prof. Sarbeśvara Das*, the then Chief-Editor. He has also shown his kind interest in going through the introduction of this publication even after relinquishing his charges. My coleague *Mr. Bhagabān Paṇdā* and Asst. Editor *Sri Suresh Ch. Jenā* rendered all possible help throughout the preparation of this editon. *Mr. Prabhañjana Paridā*, Asst. Director (Production) has taken all the care for getting the work printed and published as early as possible.

Directorate of Tourism, Sports & Culture, Bhubaneswar.

PRAMILA MISRA
9th February, 1981

---

1. श्रुत्वेत्थं किम्वदन्तीं मुररिपुरपि सस्वर्वयस्यैः सहेत्वा
दृष्टा राधामगाधाशयमथ ललिता स्नापयित्वा स्मितोर्म्या ।
तां कान्तां भावभावां क्विमिति किमिति च प्रश्नदम्भेन तूर्णं,
कर्णान्ते च.चुम्बन्निभृतमतिभृतं विश्वभद्रं वितत्ताम् ॥

सूची-पत्रम्

केलिकल्लोलिनी

प्रथमस्तरङ्गः

श्री शिवाय नमः

श्रीराधाकुचकुम्भकुङ्कुमरजोराजीविराजत्तया
सन्ध्यादीधितिसान्द्रसुन्दरतरं निन्दन्नमन्दं नभः ।
सुस्मेरः स्मरचन्द्रसागरहृदि श्यामादिरामाजने
वृन्दारण्यवरेण्यकल्पविटपोगोपोपतिः पातु वः ॥ १ ॥

मदनमुदितराधाकृष्णहासैकफेना
विलसितरसलीलोल्लोलकल्लोलमाला
प्रतिपदमनुरागानल्परागाब्जतुङ्गा[1]
स्फुरतु रसिकसिन्धौ केलिकल्लोलिनीयम् ॥ २ ॥

कृष्णाभिलाषतटिनीविलसद्रसौघै-
र्नुन्नेव कामकुमुदेन्दुकला कदाचित् ।
राधा दधार बहुधा वसुधावतंसं
वृन्दावनं कलयितुं किल कौतुकानि ॥ ३ ॥

हरिं[2] हराद्गणोऽनलकीलभस्मितं
प्रजीवयन्ती प्रसृतैः स्मितामृतैः ।

---

1. अनुराग एव अनल्परागाब्जं तेन तुङ्गा ।
2. कृष्णे कोकिलषट्पदे क्षितितले चन्द्रे मृगे वायसे
सिंहे बर्हिपुरन्दरे मृगमदे कप्यर्कभेके नभे ।
सर्पे रात्रिचरे तथा कचकुचे मार्गे चिवृके निशि
कामे वाजिघ्रने गजेन्द्रगिरिशे कीरे युवत्यां हरिः ॥

ननन्द वृन्दावनमेत्य राधिका
सखीचयोल्लासपयोधिचन्द्रिका[1] ॥ ४ ॥

समुल्लसद्भिः सुमनःसमुच्चयैः
क्वचिद्विचित्रेन्दुरुचिभ्रमाकरम् ।
सुकज्जलच्छायतमालमालया
क्वचित्तमःस्तोमधियोविधायकम् ॥ ५ ॥

क्वचिल्लसद्वल्लरिनव्यपल्लवै—
र्नवार्ककान्तिप्रकरभ्रमाकरम् ।
क्वचिच्च चन्द्रोपलकान्तकेतकैः
सुषीमधामद्युतिशेमुषीप्रदम्[2] ॥ ६ ॥

कलिन्दकन्याजलजालिधूलिभिः
समन्ततः संतत संस्तुतस्थलम् ।
अपि क्षपायां नवभानुभाधिया
प्रमोदचञ्चत्तरचक्रचक्रकम् ॥ ७ ॥

समुल्लसत्कोमलमालतीततिः—
स्फुरद्रजःसंहतिसंहितान्तरम् ।
नयच्चकोरप्रकरं दिवाऽप्यहो
चिराय चन्द्रोदयशेमुषीमुदम् ॥ ८ ॥

चलत्कदम्बावलिधूलिपालिभिः
समाकुले नीलमणीमयस्थले ।

---

1. सखिचयानामुल्लास एव पयोधिः तस्य चन्द्रिका इव उपमितम् ।
2. सुषीमधामश्चन्द्रस्तस्य द्युति शेमुषीं प्रददातीति तत् बुद्धिर्मनीषाधिषणाधीः प्रज्ञा शेमुषीमतिः ।

प्रसक्तसन्ध्याकरपुष्करभ्रमं
विभावयन्नन्दनगञ्जिमञ्जिमम्[1]— ॥ ९ ॥

विभाव्य वृन्दावनमिष्टवन्दनं
महामदाद्वैतमयं निरामयम् ।
इयं समुल्लासविलासवीचिभिः
सुखामृताब्धौ निममज्ज मञ्जुलम् ॥[2] १० ॥

एषा गुणप्रवणबाणलताजयन्ती
कामस्य नो वत धिगित्यवगत्य नूनम् ।
तत्पादपद्मनमनव्रतिकौतुकेन
मुक्ता मुहुः सुमनसो दवदेवताभिः[3] ॥ ११ ॥

अहमहह जितोऽस्याः सौम्यनिश्वासपुरै—
रतरसहसभासा भर्त्सितं च प्रसूनम् ।
इति किमु कलयित्वा भीत भीतो[4] वितेने
मलयमरुदमुष्यां तस्य[5] नम्रस्य सङ्गम् ॥ १२ ॥

द्रवमिव हरिचन्दनस्य लिम्पन्मलयमरुन्मकरन्दमङ्गपाल्याम्[6] ।
सकलरसकलासुधानदीं तां पटकलनाकपटादिवालिलिङ्ग ॥ १३ ॥

---

1. पुनः चलन्त्यः याः कदम्बावलिधूलिपालयः नीपश्रेणीरजोराजयः ताभिः समाकुले व्याप्ते नीलमणिमयस्थले मरकतप्रचुरभूभागे नन्दनगञ्जिमञ्जिम नन्दनमिन्द्रवनं तद्गञ्जिमञ्जिमा शोभा यस्य एवं भूत तत् प्रसक्तसन्ध्याकरपुष्करभ्रमं प्रसक्तः सङ्गतं सन्ध्याकरः सन्ध्याकालीनकिरणं यत्र एवं भूतस्य पुष्करस्याकाशस्य संभ्रमं विभावयत् किंवा Ms. reads मञ्जिम ।
2. षड्भिः कुलकम् ।
3. एषा राधा कामस्य गुणप्रवणबाणलताजयन्तीति अवगत्य नोऽस्मान् धिगस्तु इति कौतुकेन दवदेवताभिर्मुहुर्मुक्ताः सुमनसः कर्त्री तत्पादपद्मं अनमन् नमस्कुर्वत्यः स । वने च वनवह्नौ च दवो दावश्च कीर्त्तितः ।
4. प्रकारे गुणवचनस्य पुंवद्भावः ।
5. प्रसन्नस्य ।
6. स्त्रियः पाल्यास्रकोटयः (अ)

कुसुमानि जितानि यन्नखैर्ययुरस्याः शिर एष वातदोषः[1] ।
स्खलितानि नतानि तानि पादे यदराजन्त नितान्तमौचितो सा ॥ १४ ॥

सा नीलचेलावरणाद्वराङ्गी कस्तूरिकास्तोर्णामिवापिवर्ष्म[2] ।
मरुच्चलद्गौरपरागपूरैः कर्पूरवेण्याकृतवद्व[3]भार ॥ १५ ॥

पुष्परेणुकपटात्पटवासं[4] वीरुधो[5] वितकरुः रुरुनेत्र्याम् ।
येन चारु रुरुचे मुखमस्या धूलिशालिनलिनद्युतिचौरम् ॥ १६ ॥

क्वचित्स्थले स्थलनलिनीवनाकुले रजःकुले रसकलिले[6] निमज्य सा
पटं पटं हरितमपि स्फुटं दधे महामहारजननजरञ्जनायितम् ॥ १७ ॥

व्यतस्ततस्त्रिभुवनभ्रमणश्रमेण दूरात्तृषार्त्त इव पीतमरन्दवृन्दः
कुत्रापि नूतनकपीतन[7]रेणुपूरैर्निन्ये स्वरूपरुचिमंशुकमम्बुजाक्ष्याः ॥ १८ ॥

एषा क्वचित्कनककेतकोकाननस्य[8]
रेणूत्करैर्दलितकुङ्कुमवामवीरैः ।
पीता कृतं पटमलक्षितमादिता[9] स्वे
गात्रे नवीनघनपीतनपीवराभे ॥ १९ ॥

दध्रे सा क्वचिद्राचितौड्र[10]रुचिभिः शोणोपलश्रेणितां
कस्मिंश्चिद्वनकुन्दवृन्दकिरणैः[11] कान्तेन्दुकान्तालिताम्[12] ।

---

1. एषः पवनापराधः ।
2. वर्ष्म देहे गृहे रश्मौ (अ) देहम् ।
3. कृतमिव ।
4. पिष्टातः पटवासकः ।
5. क्षिप्तबलाः ?
6. रसातिशयिते ।
7. शिरीषस्तु कपीतनः ।
8. Ms. also reads एषा क्वचित्प्रचुरकेशरकाननस्य ।
9. Ms. reads o मादित ।
10. ओड्रपुष्पं जबेत्यमरः । Ms. reads ओढ्र
11. धावल्यात् ।
12. शोभेन्दु कान्तालिताम् ।

कुत्राप्युल्बण[1]नीलबाणघृणिभिः स्वाराड्मणीराजितां[2]
हैम्यां कुत्रचनाऽपि केतकततौ सादृश्यतो दृश्यताम् ॥ २० ॥

एतस्या वकुलकुलं स्फुटं कटाक्ष—
श्रोतोभिर्घनिततया घनाघनाभम् ।
नालक्ष्य स्वतनुसदृक्तया रयात्त—
न्निर्यात्ततः खमलिमरोऽकरोत्तमिस्रम्[3] ॥ २१ ॥

मधुकरनिकरः खलु स्खलित्वा
वकुलकुलादधरं पिपासुरस्याः ।
स्मितविततिभरादराजदभ्रे[4]
सपदि पतत्करकोत्करप्रकारः ॥ २२ ॥

शफरीदृशो मुखसरोजसौरभं
प्रतिसंपतत्यलिकुले समाकुले ।
वकुलानि पेतुरतुलानि भूतले
त्रपया किमु स्वजनजादनादरात् ॥ २३ ॥

नखरुचिमधुपातुं सिञ्जितं शिक्षितुं वा
पदजलजयुगेऽस्या हंसकाभ्यां गुरुभ्याम् ।
सरभसमलिपाली व्यानमन्नाददम्भा—
न्नुतिमवकलयन्तो कन्दलत्तर्षवल्ली ॥ २४ ॥

स्फुटनासिकापुटमहेन्द्रमणी—
किरणावलीव मधुपालिरभात् ।
मलयानिलात्परिमलात्परितः
सुदृशोऽथ निश्वसितमेतवतो ॥ २५ ॥

---

1. उल्वणं व्यक्तं स्पष्टं (अ) ।
2. स्वाराट्नमुचिसूदनः ।
3. Ms. reads o त्तमिश्रि ।
4. स्मितकान्तिनामेषु संक्रान्तत्वात् ।

रसालसालं[1] स्मरशास्त्रशालं जज्ञौ समाश्लिष्य दृशा कृशाङ्गी ।
आभुग्नगुच्छावलिचापपालीशिलीमुखालोकलितान्तरालम् ॥ २६ ॥

कन्दर्पदर्पकृतये मधुदूतभावा—
दन्यर्थमेव दधतं मधुदूतनाम ।
पीतप्रसूनभरपीतरसालसालं
सालं ससाल कनकाद्रिधियं समीक्ष्य ॥ २७ ॥

माकन्दकन्दलकुलं किल वीक्ष्य मेने
राधा स्वकश्रवणपूरकृते कृतेष्टिः ।
सिन्दूरयष्टिचटुलप्रवलप्रवाल—
वल्ल्यङ्कुरप्रकरमेव मधुप्रक्लृप्तम् ॥ २८ ॥

उन्नम्रमाम्रविटपे परिपेयमक्ष्णा
वातोद्धुतोद्धतरजस्ततिगुच्छजालम् ।
एषा समुन्मिलितपीतपताकमुच्चै—
र्हेमध्वजव्रजमनङ्गनृपस्य मेने ॥ २९ ॥

एषा विनीलदलसान्द्ररसालसाल—
मालोक्य नीरधरसार इति व्यबोधि ।
चार्विन्द्रचाप इति कर्बुरपल्लवालीं
गुच्छावलिं च रुचिरामचिरप्रभेति ॥ ३० ॥

वञ्जुलं[2] शितिपलाशवञ्जुलं[3]
वीक्ष्य पुष्पचयसंचयालयम् ।
अन्धकारभरमित्रमित्रभा—
स्तोमविभ्रममवाप साद्भुतम् ॥ ३१ ॥

---

1. आम्रश्चूतोरसालोऽसौ इत्यमरः ।

2. अशोकम् ।

3. शितधवलमेचकौ, मनोज्ञं मञ्जुमञ्जुलम् ।

मधुपावलिभिः शबलं प्रबलं
विमलं स्फुटवञ्जुल[1]जालमलम् ।
इयमाकलयज्जलदालियुजो
घनसान्ध्यकरप्रकरस्य धिया ॥ ३२ ॥

तुलितप्रवालशकलप्रकरं
कलिकाकुलं विजयिवञ्जुलजम् ।
क्रमशोऽभिशोभिरविरुच्यरुणं
जलबुद्बुदोत्कर[2]इवेयमवैति ॥ ३३ ॥

उद्वेल्लदुल्लस्यदुरुच्छदच्छटा—
सक्ते ज्वलद्वञ्जुलगुच्छमण्डले ।
उल्लोलकल्लोलकलिन्दनन्दनी—
नीराक्तरक्ताब्जधियं दधार सा ॥ ३४ ॥

यमिनोऽपि मोहयितुमीहते साहसे
सहकारितां द्रढयति द्रुमे दाडिमे ।
मदनेन दत्तपटुपट्टशाटीलतां
मनुतेस्म सोच्छलितसूनमालाच्छलात् ॥ ३५ ॥

असितमणिघटोघटाश्रिता सा
फलपटलस्य मिषेण दाड़िमद्रौ ।
सरसकुमुदबीजकोषवृन्दं
समवकलय्य समारताद्भुतेन ॥ ३६ ॥

रुचिरकरकसंपुटान्तरस्थ[3]
परिणतबीजगणारुणाश्मजालम् ।
भ्रमनुत सहसा नसा न वृन्दा—
वनकलितं परमोपदापदं स्वम् ॥ ३७ ॥

1. वञ्जुलोऽशोक इत्यमरः ।
2. निपातेनेत्यभिहिते कर्मणि द्वितीयाविभक्तिः ।
3. करकस्तु दाडिमम् । समुद्रकः संपुटकः इत्यमरः ।

वरकरक[1]कुलस्य व्यक्तरागस्य दम्भा—
निजकुचजयनिन्द्यं कुम्भिकुम्भव्रजं सा ।
विकटविटपिकूटादूर्द्ध्वशीर्षादधस्ता—
न्निपतितमिव नम्रं मन्युताम्रं च मेने ॥ ३८ ॥

व्याकोषकुन्दकुसुमासमशुक्तिकोषे
संक्रान्तकान्तिधवलीकृतभृङ्गमुवताम् ।
संवीक्ष्य हर्षसरणिं सहसा ससार
संसारसारकुतुकामृतसारिणो सा ॥ ३९ ॥

विरहिविकिरव्यूहं वेद्धुं नु हाटककण्टक—
प्रकर उदितः शातः कामैकशाकुनिकेन किम् ।
इति मनसि सा कृत्वा भीत्वाऽभिगन्धफलीकुलं[2]
नयननलिनद्वन्द्वे निद्रां दधौ क्षणमाकुलम् ॥ ४० ॥

अतिपीतितं कनकचम्पककान्त्या
भ्रमरोत्करं कलरवैः कलयित्वा ।
किमवैत्र संक्रमचणेन गुणेन
प्रकृतं गुणं सपदि विप्रकृतं सा ॥ ४१ ॥

रक्तातपुष्पाणि चिचेत वीक्ष्य सा
जगद्विजेतुं स्वबले बलेच्छया ।
चेतोजराजस्य मुखाम्बुजच्युता
विशालताम्बूलरसोयविप्रुषः ॥ ४२ ।

---

1. करकस्तु करङ्के स्याद्दाड़िमे च कमण्डलौ
पक्षिभेदे करे चापि करका च घनोपलै ।

2. एतस्य कलिका गन्धफलीत्यमरः । चम्पाकढी नाम । बिष्वक्सेनागन्धफली कारम्भाप्रियकश्चसेत्यमरः
प्रियङ्गु इति ख्यातः ।

विनिद्ररोमाङ्कुरसङ्करस्व—
कुचश्रिया धापितया भिया किम्।
वेगान्नगस्याग्रगमालुलोके
कदम्बपुष्पस्य[1] कदम्ब[2]मेषा ॥ ४३ ॥

पटुका च पुटस्फुटश्रियं सा
परमालूरक[3]फलौघमालुलोके।
अभिषेकमतामृताभिपूर्णं
किमु नीलाश्मघटाघटं स्मरस्य ॥ ४४ ॥

परिणतिपरिपीतमातुलुङ्गा[4]—
वलिकपटात्कनकाब्जकोरकालिम्।
तरुशिखरशिखाभवां विभाव्य
द्रुतमभृत प्रभृताद्भुतामुदं सा ॥ ४५ ॥

रतिकान्तधन्विधुरन्धरन्वलता—
च्युतहाटकीयगुटिकौव इति।
हरितालतारुचिपक्वतर—
द्रवसारदारनियमाकलयत् ॥ ४६ ॥

अमलकमलकुट्मलाकृतीनि
[5]स्फुटकमलानि पचामलानि दृष्ट्वा।
बहुलदलतमो गवेषिणी सा
नवरविदीधितिमण्डलीरबोधि ॥ ४७ ॥

---

1. नीपपुष्पस्य
2. समूहम्
3. o मालूर in the Ms.
4. मातलङ्गा in the Ms.
फलपुरो बीजपुरो रुचको मातुलुङ्गके।
5. स्फुटानि कमलायाः कुलानि

अव्यक्तभासुरदशार्द्धशिरं सपाक[1]—
सत्कृष्णपाकफलमुज्ज्वलमुद्विलोक्य ।
संतीक्ष्णपञ्चशरपञ्चशरीक्षताङ्गं
माणिक्यखण्डमयलक्ष्यमलक्षि तन्वा ॥ ४८ ॥

पाकोद्रेकोत्तुङ्गरागं वराङ्गी
दध्रे रङ्गं नागरङ्गं विलोक्य ।
पर्णश्रेण्या कीर्णभावेन कीर्णम्
श्यामाश्मालीशालिशोणाश्मशोभम् ॥ ४९ ॥

[2]जम्भव्रातं जृम्भितपाकं रसपूर्णं
कान्दर्पं किं शोणमणीकर्करिकौघम्
दर्शं दर्शं निर्निमिषा निर्भरमेषा—
शेषानन्दाम्भोनिधिमध्ये निममज्ज ॥ ५० ॥

कालिन्दीजलपुटमण्डलप्रकारं
तालानां फलकुलमाकलय्य पक्वम् ।
सा मेने मनसिजराजनिर्जितानां[3]
लोकानामयशसां समूहमुच्चैः ॥ ५१ ॥

समीरणप्रवलितवृन्तवल्लरी—
च्छलाच्छ्रितं विसृमरचारुचामरम् ।
सुमङ्गलं नवयुवलाङ्गलिद्रुमं
विवेद सा मदननृपोपजीविनम् ॥ ५२ ॥

---

1. अव्यक्ताः भासुराः दशार्द्धसंख्यकाः । पञ्चसंख्यकाः शिरा यस्य तत् । कृष्णपाकफलाविग्नसुषेणाःकर-मर्दके (अ)
2. जम्भजम्भीरजम्भलाः
3. मनसिज एव राजा तेन निर्जितानाम्

आमैः फलैः[1] पृथुलनीलशिलाकुलेन
पक्वैश्च युक्तमुरुशोणमणीगणेन ।
सा पूगपूगमवलोक्य विवेद विज्ञा
कन्दर्परूप्यमयकेतनकाण्डकाण्डम्[2] ॥ ५३ ॥

चेतोभूगोपुर[3]परमतमस्वर्णास्तीर्णार्गलवितितिधिया ।
सादर्शत्किं न कनककदलीः पत्रालीतोरणगणललिताः ॥ ५४ ॥

[4]काश्मीरजच्छविरजःपटलाकुलालि —
मालाञ्चलाद्दधति पिङ्गलवैजयन्तीम् ।
आलोकयत्सकललोकजितः स्मरस्य
सा कौतुकात्कनककेतककेतनानि ॥ ५५ ॥

विशुद्धजातिं वरवर्णिनी[5]ज्वल —
त्प्रवालभूयोमरणां लसद्रसाम् ।
प्रकामधामस्तवकां सुपत्रकां
ददर्श राधा पुरुषानुसारिणीम् ॥ ५६ ॥

मृदुफेनविन्दुनिवहेन विभ्राजितां
ह्रदिनीधवप्रबलवीचिवीथीमिव ।
ईयमानयन्नयनमिद्धपुष्पव्रजां
दलजालसान्द्रनवमालिकावल्लिकाम्[6] ॥ ५७ ॥

विकसितविधुविन्दुबन्धुपुष्पं
दलकुलसंकुलमल्लिकाक्षुपं[7] सा ।

---

1. आमो रोगे तद्विशेषे आमोऽपक्वे च वाच्यवत् ।
2. समूहम् ।
3. पुरोद्वारः तु गोपुर ।
4. काश्मीर in the Ms. ।
काश्मीरं कुङ्कुमे प्रोक्तं टंकपुष्करमूलयोः ।
5. उत्तमोवरवर्णिनीत्यमरः ।
पुंनागेपुरुषस्तुङ्गः केसरो देववल्लभः ।
6. सुमनामालतीजातिःसप्तला नवमालिका ।
7. ह्रस्वशाखाः शिफाः क्षुपाः ।

अकलयत किल स्थलीमृगाद्या
विलसितमौक्तिकसूत्रकेशराशिम् ।। ५८ ।।

अग्रपर्वपुटभोगमुद्भटं
बिभ्रतीं किशलयैकजिह्वकम् ।
सा ददर्श मदनस्य मायिनो
नागवल्लीशितिनागपाशिकाम् ।। ५६ ।।

अधाद्राधा दृष्ट्वा सुमतसुमनोवल्लिनिवहं
लसद्बाणेष्वासत्रततिततिबुद्धिं स्मृतिभुवः ।
असौ चैनां सङ्गे सपदि कलयित्वा स्वकलुषं
भ्रमद्भृङ्गीव्याजादिव बहिरकार्षीद्बहुतरम् ।। ६० ।।

न्यूनत्वादिव नयनद्वयस्य दीप्त्या
त्रस्यन्तोऽप्यथ हरिणा इतस्ततस्ताम् ।
अद्राक्षुर्बहुमुहुरुन्मनायमाना
मञ्जीरस्वरवरगीतसीधुपानैः ।। ६१ ।।

सा क्रेंकृतिं कुसुमकार्मुककार्मुकस्य
तारस्वरं रतिचलत्कलकाञ्चिकायाः ।
स्वानूननूपुररदानुकृतं निनाय
कर्णं कलापटुकलापिकलापनादम् ।। ६२ ।।

कनककुसुमकान्त्या चञ्चितां चञ्चुपंक्त्या
रुचिरसरसदूर्वा[1]श्यामलां कीरमालाम् ।
अमनुत[2] मदनेन स्वोपदात्वेन दत्तां
सदरुणमणिदामश्यामरत्नस्रजं सा ।। ६३ ।।

---

1. दुर्वा in the Ms.

2. अनुमत in the Ms.

अथ माधवीमधुरपुष्पभर—
स्फुरदन्तरं तत तमालवृतम् ।
परितः परीतसलिलानि न वा
कति सैकतानि तुलयज्जलधेः ।। ६४ ।।

विलसत्कदम्बनिकुरम्बधूलीभरं
नवमालिकाकुसुममालिकासंकुलम् ।
दिवसेऽपि सान्ध्यरुचिसान्द्रचन्द्र—
प्रभाप्रकरभ्रमाच्च कितयच्चकोरोच्चयम् ।। ६५ ।।

यमुनाजवनाम्बुना समीरप्रविकीर्ण्णेन निरन्तरं प्रसिक्तम् ।
विजितामृतयन्त्रवेश्मलीलं परितः पूरितमाकरन्दपूरम् ।। ६६ ।।

रतिपतिपरतरवीरनिनाद—
भ्रमकृतिकृतिवनकुक्कुटरावम् ।
अलिकलकलकलकोकिलकेली—
मधुररवमधुभूधवतूर्यम् ।। ६७ ।।

तुङ्गरङ्गसङ्गभृङ्गवासितस्य[1] दम्भतः
कामकामवल्लकीयसान्द्रमन्द्रमाश्रितम्[2] ।
केलिशालिसारसालिकूजितस्य कैतवा—
त्काञ्चिदामशिञ्जितं[3] च दावदेवयोषिताम् ।। ६८ ।।

कलितकुतुककालकण्टककाली—
कलकलहुंकृतिकैतवाद्दधानम् ।
मदनरतिरसे रतेस्तरन्त्याः
स्फुटमिव मन्मनमुन्मनीकृतायाः ।। ६९ ।।

---

1. तिरश्चां वा शितं रुतमित्यमरः ।
2. कलो मन्द्रस्तु गम्भीरे इत्यमरः ।
3. भूषणानां तु शिञ्जितमित्यमरः ।
सिञ्जितं in the Ms.

ततान्छगुच्छकच्छलान्मरुद्धूतोरुचामरं
निरन्तरस्फुरत्तरप्रसूनसद्वितानकम् ।
स्थलारविन्दिनीलसत्पलाशशय्यमुज्ज्वलं
निकुञ्जकेलतीकलापुरं परं ददर्श सा ॥ ७०[1] ॥

रत्येककेलिकलकोकिलनादवाद—
संवावदूकमथ मन्मथमन्त्रबीजम् ।
एषा मनोहरिणहारिविहारगीतं
वेणुक्वणं श्रवणभूषणमाप किञ्चित् ॥ ७१ ॥

कुत एष इति प्रतीतिलुब्धा
चलत्यालिङ्गय दृशा दिशो दशाऽपौ ।
किमपि क्रमशस्तमालनीलं
तरलं धाम सुधामयं ददर्श ॥ ७२ ॥

संमुमोह महता महसा सा
तेन सूनशरदिग्धशरेण ।
अद्भुतं किमपि संभृतमन्त—
र्बिभ्रती रसरसायनसीमा ॥ ७३ ॥

मुहुर्मुहुर्दर्शनसीधुसेकै
रोमाङ्कुरं पल्लवितं विधाय ।
अथ स्मराद्वैतपथं स्मरन्ती
सा योगिनीव स्तिमिता बभूव ॥ ७४ ॥

सा कटाक्षबाणपाशवीरुधा कृष्णनामगुरुधामकोमलम् ।
आकलय्य किल चिल्लिचालनादाचकर्ष कृतहर्षतर्पणा ॥ ७५ ॥

---

1. Ms. reads सप्तभिः कुलकम् after this verse.

नखरकरमकरन्दभाङ्मुरारे—
[1]श्चरणनवारुणनीरजं समेत्य ।
नयनमधुकरोऽकरोदमुष्या
विकटकटाक्षमिषेण[2] चुम्बनानि ॥ ७६ ॥

पदपङ्कजकान्तियावपङ्कात्
क्षणमुद्धे्ँ क्षणवारिभिः स्खलित्वा ।
दृढ़नोविनिवद्धवद्दृगस्या
रसिकश्रोणितटान्न निःससार ॥ ७७ ॥

कन्दर्पकेलोरसकूपरूप—
नाभीह्रदान्तस्ततपातपङ्कम् ।
अस्या दृशं रङ्कुवधूं बबन्ध
तल्लोमवल्लीगुरुवागुरोच्चैः ॥ ७८ ॥

तस्य कुङ्कुमपरागपरागस्फाविविस्फुरदुरःशितिकञ्जम् ।
प्राप्य हारकरकेशरदाम्ना बन्धमाप ललनानयनालिः ॥ ७९ ॥

तत्पाणिपद्मरुचिचञ्चनखांशुलेखां
सन्ध्येऽस्त्रमिश्रविमलेन्दुमयूखमालाम् ।
एणीदृशः प्रचललोचनचन्द्रकोषः
पीत्वा मुहुः किमपि संमदमाददेऽन्तः ॥ ८० ॥

तद्भुजेऽङ्गदमणीघृणीच्छटाकामपाशभृशबन्धमागतौ ॥
एतदीयनयनाख्यखञ्जनौ चापलं व्यजहतामलं निजम् ॥ ८१ ॥

कण्ठकोटरतटं मुरशत्रोर्भाविनीक्षणनृभाषण (?) एत्य
पक्ष्मपक्षपटलं स्थगयित्वा निर्भरं चिरतरं स्वपिति स्म[3] ॥ ८२ ॥

नतगर्भयोर्यदुपतिश्रुतिपेश्योः[4] स्फुटमौक्तिकप्रकरकान्तिपयांसि ।
युगपद्विलोचनयुगं रसवत्या रतिकामकेलिकुररौ चरतः स्म ॥ ८३ ॥

---

1. मानवा मौलिनो वर्ण्या देवाश्चरणतः पुन इति स्मरणात् ।
2. Ms. reads मिषेण ।
3. Ms. reads स्वपति स्म ।
4. शुक्त्योः ।

दधति नलिनबान्धवं विशुद्धारुणमणिकुण्डलमण्डलच्छलेन ।
नयनयुगलमब्जलोचनाया मुरहरगण्डतले वरं प्रफुल्ल ।। ८४ ।।

मुरजिच्चिबुके कटाक्षकोटीमधुरधारा मधुरा निपत्य तस्याः ।
अतिनिम्नतया रयाद्दधाना भ्रमिमुत्थातुमलं बभूव नैव ।। ८५ ।।

व्रजविटमुखमेत्य नित्यलोलं
प्रणयमनायि दृशोर्द्वयो यदस्याः ।
तदतनुतरां परस्परीयं
किमु कमलोपमया सुहृत्तमत्वम् ।। ८६ ।।

धृताधरोद्यन्मधुदन्तकान्ति—
हैयंगवीनं[1] विनिपीय तस्य ।
अदोद्विनेत्री वत मूर्च्छितेव
चित्रं चिरं निश्चलतां ततान ।। ८७ ।।

हरिमुखोन्मिलितस्मितमोक्षणं
मृगदृशो विनिपीय पयोव्रतम् ।
रुचिरमावरतिस्म कलावती
किमपि कर्म मनोभवदैवतम् ।। ८८ ।।

ओष्ठाधरस्फुरितदीधितिपूरितत्वा—
द्बन्धूककोरकमनोरमविम्बबुद्ध्या ।
तद्दक्शुकी तरुणगन्धवहाप्रणाली—
श्वासोर्मिचञ्चिनवमौक्तिकमुच्चुचुम्ब ।। ८९ ।।

स्वनयनशफरोद्वयस्य सख्यं
सहजतया सहसैव पद्मलाक्षो ।

---

1 तत्र ह्यो गोदोहोद्भवं हैयंगवीनं (अ) ।

अतनुत नवचिल्लिशैवलाली—
लुलितशिखे कमनस्य नेत्रकञ्जे ॥ ६० ॥

प्रियालिके प्रवलितचिल्लिवल्लरी—
समुल्लसद्विलसितवीचिपिच्छिले ।
चिराय यन्नयनझसौ स्थिरं स्थितौ
मृगीदृशस्तदुदितमद्भुतं महत् ॥ ६१ ॥

सत्सूक्ष्मपक्ष्मबहुसंख्यकपादभावात्
कृत्वा स्वषट्पदपदं वितथं भयेन ।
आत्तान्यरूपमपि तन्नयनालिमिद्धया
वैराद्बबन्ध किमु केशवकेशपाशः ॥ ६२ ॥

कंसारे रचयत उच्चयै रुचीनां
कालिन्द्या असमयवृद्धिबुद्धिमुच्चैः ।
प्रत्यङ्गं समवकलय्य सारमाढ्यं
प्राहृष्यन्नवजलदस्य बर्हिणीव ॥ ६३ ॥

दृष्टिसीधुमयसिन्धुतरङ्गै—
र्हारिभिर्हरिरपि स्नपयंस्ताम् ।
गूढभावनवरत्नरुचीद्धे
नर्मशर्मजलधौ निममज्ज ॥ ६४ ॥

परस्परालोकनसीधुसिन्धु—
स्तयोः समप्यायि सहर्षवर्षैः ।
व्रीडान्धकारं विचकार सद्यो
जातो यतो मन्मथसीतधामा ॥ ६५ ॥

वयमिह बहुकालं किं स्थिता विस्मिताः स्म
तदित[1] इतरदेशं स्वच्छमागच्छ याम ।

---

1. Ms. reads स्तदित

तदनु ललितयेति स्मेरमुक्ता नताङ्गी
मम बलयति लीलां पल्लवो[1]ऽत्रेत्यवोचत् ॥ ६६ ॥

इति गदितवतीमतोवहादा—
दथ ललिता ललितामिमामुवाच ।
इह विलसतु पल्लवे नवे ते[2]
प्रियसखि रागविपर्ययो मयोच्चैः (?) ॥ ६७ ॥

अथ सा ललितां नितान्तहृद्यां
रभसादेतदुवाद वक्रिमज्ञाम् ।
विटप लिसमागगात्तनुत्वं
मम पुष्पेषु रसप्रसक्तिमाशु[3] ॥ ६८ ॥

सखीजनतया समं तत इतः प्रतार्य त्रपां
स्रयुः सललितां सया स्वभुजया प्ररोह्य स्पृहाम् ।
स्तनोल्लसितवाससा सहविकीर्य धैर्यं च सा
विमोहनमयेऽपतद्रतिपतीन्द्रजालार्णवे ॥ ६९ ॥

संलुभ्याथ मुहुर्मुहुर्मंहमयीं श्रीकृष्णवक्ष्मश्रियं
ग्रीवाभङ्गविभङ्गरोल्लसितया पश्चात्पिबन्ती दृशा ।
औत्सुक्यार्णवसंतरत्तरमनाः श्रान्तिच्छलात्कुत्रचि—
त्कुञ्जावास उवास सा ललितया युक्तैकया हृजज्ञया ॥ १०० ॥

पातिव्रत्यसुधासरित्प्रसरभूः श्रीनिम्बदेवोगिरां
जोवातोर्यमजोजनज्जनमतं श्रीमच्छतंजीवतः ।
तेनेराभिरनादिना विरचिता या केलिकल्लोलिनी
तस्यामेष लसद्रसो व्युपरमं पूर्वस्तरङ्गोऽगमत् ॥ १०१ ॥

श्री राधाकृष्णसंदर्शनो नाम ॥

---

1. नायकः ।
2. पल्लवस्तरुणे न(व)पल्लवे चेति(वि) ।
3. कन्दर्पशृंगारप्रसक्तिम्
सुमनःसु प्रसक्तिम् ।

द्वितीयस्तरङ्गः

राधा निधाय हृदये बहुधा सबाधा
प्रेयःकटाक्षकपटान्मदनाधिकर्त्रीम् ।
ग्लानिं जगाम विरहानलधूमधाम—
संनिर्मितामिव ततो विततोपतापाम् ॥ १ ॥

रतेर्द्युतेरिव विजयापमालया
क्रुधा व्यधात्तनुमवला तनूलताम् ।
निदाघवद्विषय[1]विलासविद्रव—
प्रदारणो रणरणकः[2] सुदारुणः[3] ॥ २ ॥

प्रियदृष्टिमयं निपीय सा
नवलाङ्गल्यमृतं रसामितम् ।
कुसुमेषुशरस्फुरद्रजः—
परकर्पूरगुणान्मुमूर्च्छ किम् ॥ ३ ॥

सुषमागुणजालमालया
स्मरता (?) तस्य ततं नियन्त्रिता ।
विषयाम्भसि चीनचक्षुषः
स्फुरितुं दृक्शफरी शशाक नो ॥ ४ ॥

अधरमस्तरविच्छविरेखिकां[4]
समलिमानमवेक्ष्य तमोभरैः ।

---

1. विषयो गोचरे देशे इत्यमरः ।
2. कन्दर्पः
3. उत्कृष्टमरणः ।
4. अजहल्लिङ्गत्वादविधेयत्वाद् वा स्त्रीलिङ्गता ।

उचितमातनुत द्रुतमुच्चकै—
विनततां वत तन्नयनाम्बुजम् ॥ ५ ॥

स्फुरति[1] लोतकसंतति दुर्दिने[2]
स्तिमितचिल्लिविचित्रपतत्रकौ ।
मृगदृगोक्षणखञ्जनजम्पती
अवहतां वरमेव तिरोहितिम् ॥ ६ ॥

मत्त एव[3] मदमत्तत एषा
का तत्कान्तिकलनाकुलतोऽस्याः ।
आश्रयापकृतिकृत्यहमित्थं[4]
व्रीडया किमनमत्सुदृशोऽक्षि । ७ ॥

शोभयाश्रिततया मम वैरात्
प्राप्य पुष्पमसमेषुशरत्वम् ।
वेमिदीति सुतनूमिति नूनं
चिन्तया मृगदृशो दृगसीदत् ॥ ८ ॥

अस्य मित्रममितां प्रियश्रियं
वीक्ष्य सेयमयते दशामिमाम् ।
इत्थमम्बुनिकरैर्व्यकारय—
त्तद्विलोचनममन्दमञ्जनम् ॥ ९ ॥

निःसृतप्रततलोतकाम्बुधौ
बिम्बितं स्वनयनं समीक्ष्य सा ।
मीनकेतुजयकेतुतर्किणी
कम्पमाप भृशमद्भुतं द्रुतम् ॥ १० ॥

---

1. सत सप्तमीयम् ।
2. मेघाच्छन्नोऽह्नदुर्दिनम् ।
3. नातेति शेषः ।
4. आश्रयस्य अपकृतिं अपकारं करोतीति ।

भृशमीष्मवियोगतामसी—
तमसाश्रस्त इवाथवा पुनः ।
स्मरसर्पविसर्पिरुग्विषै—
र्विषितोऽम्लायत योषितोऽधरः ॥ ११ ॥

घननिःश्वसनच्छलेन हृ—
[1]ज्ज्वलत्कामानलधूमधारया ।
अधरौष्ठमसौष्ठवाच्चरं
मृगनेत्र्या मलिमानमागमत् ॥ १२ ॥

विरहिणीगणदारुणदुर्यशो
मलिमलोढ इव स्मृतिजन्मनः ।
तुलितनीरसमेचकनीरज—
स्तदधरो विललास मलोमसः ॥ १३ ॥

रतिपरोपतया[2] निजमाश्रयं
यदभिनद्वितताद्दुरितात्ततः ।
सपदि रूपमवाप मलीमसं
तदधरस्फुटरक्तककोरकः ॥ १४ ॥

शुभ्रवारिरुहि वा भ्रमरोऽहं
गण्डचन्द्रमसि लक्ष्मलसेयम् ।
इत्थमुत्सुकतया नतया किं
चस्खले तदलकादलपाल्या[3] ॥ १५ ॥

हा वियोगीजनतुञ्जनपापाद्
दुर्यशोलिपिमयी मदनस्य ।

---

1. Ms. reads ज्वलक्कामानल ।
2. रतिपस्य कन्दर्पस्य शरतया । पत्रीरोपइषुद्वयोः । 3. भावे प्रत्ययः ।

शङ्किताऽस्मि सकलैरिति नूनं
व्यानमत्तदलकादलकाली ॥ १६ ॥

मायिमारकरकालगूढपात्—
पाश इत्यह मदाश्रयप्रियः ।
मां विलोक्य दरभूरभूदिति
प्राभ्रशत्तदलकालिका किमु ॥ १७ ॥

कामवह्निधुतधूममञ्जरी
विभ्रमं मयि विमर्त्यदः सखी ।
इत्थमाकुलतयानुचिन्तया
व्यस्खलत्तदलकावली वत ॥ १८ ॥

इयमेति रुजा निजाश्रयं
तदलं[1] मे किल शोमयेति किम् ।
श्लथतामथ धूलिधूसरा
सुदृशः केशलता वतादद्दे ॥ १९ ॥

सुतनूतनुमुत्क्षिणोत्यदो[2]
विशिखत्वाद्विषमाशुगस्य हा ।
इति पुष्पकुलं जहुर्मुहुः[3]
किमु तस्याः कचसंचया[4] भिया ॥ २० ॥

विकमिलन्दरुतिश्रुतिकम्पना—
च्चिकुरसिजव्रजतः सुतनोः पतत्—
विमलमौक्तिकजालमलं व्यधात्
कुसुममार्गणमार्गणवर्षणम् ॥ २१ ॥

---

1. Ms. reads स्तदलं ।
2. अदः पुष्पकुलं ।
3. तत्यजुः ।
4. कर्त्तारः ।

अलिततिर्वितनोति तमां रुषं
वरतनावनया घनया जिता ।
इति किमात्मरुचोमपचित्य
तत्कवलताधृत धूम्ररतां रता ।। २२ ।।

हृद्विहारिविरहोरगभूरि—
स्फारिफुत्कृतिमूर्तिं यदतायि ।
उत्पपाट पुटपाकजबाष्प—
व्याततोष्मसुतनुश्वसितं तत् ।। २३ ।।

विस्फुरद्विरहवाडवदाहा—
न्नूनमान्तरसरत्तरबाष्पः ।
योषितः श्वसितसंततिदम्भा—
न्निर्भरं बहु बहिर्भवति स्म ।। २४ ।।

क्रन्दितप्रभवशोणताभृता
चक्षुषा व्यतनुतानुबिम्बिना ।
धातुभासितसितोपलस्थल—
श्रीजयं सुतनुगण्डमण्डलः ।। २५ ।।

दन्तुरैः पुलकशैवलाङ्कुरैः
सङ्कुलैर्नयननीरनिर्झरैः ।
आबभौ सुतनुगण्डमण्डली —
गण्डशैल उदितालकालतः ।। २६ ।।

सुदृगुज्ज्वलगण्डमण्डलं
कलिलैरश्रुकणैर्नतोन्नतम् ।
अलकाकलनाभिनन्द नो
सरघाक्तं[1] किमु सारघं पुटम् ।। २७ ।।

---

1. सरघामधुमक्षिकेत्यमरः ।

धृतलोतकशीकरोत्करः
सुदृशः शुभ्रकपोलमण्डलः ।
इतरेतरमाप वुद्वुदो—
घनफेनस्तवकश्च[1] तुल्यताम् ॥ २८ ॥

वरतनूरिह संतनुतेतरां
स्मरसरीसृपपाशधिया भयम् ।
इति विभाव्य गलः किल सुभ्रुवः
सपदि हारमुपाकिरति स्म[2] किम् ॥ २९ ॥

स्तनतटात्त्रुटितः स्फुटितः स्फुर—
न्मधुरशोणमणिप्रकरोऽकरोत् ।
विरहवाडववाढकणोत्कर—
भ्रममन्ददृशो बहुशो हृदि ॥ ३० ॥

मारतापतपनातपशुष्के
सुन्दरीहृदयहेमतडागे ।
कैतवाद्विषदयोः कुचयोः किं
शुष्यतः स्म शितपङ्कजकोषौ ॥ ३१ ॥

पुष्पमत्र सुतनूतनुमित्रं
तेन मार्गणगणेन किमस्तु ।
इत्यदो हृदि कुचद्वयदम्भा—
त्कुम्भमेव समधादसमेषुः ॥ ३२ ॥

अङ्गमोषकरणाददोऽङ्गदं
किं नु कार्यममुनेत्यवेत्य किम् ।
भूषणं बहुधनं भृशं कृशं
सुभ्रुवो भुजयुगं ह हाजहात् । ३३ ।

1. Ms. reads ० स्तवकण्ठ । 2. Ms. reads ० मुपस्किरते स्म ।

शोषभृद्भुजशयं शयद्वयं
म्लानमाननशिखं नतभ्रुवः ।
दावकं त्वकुलतप्तनालतो
नव्यपल्लवयुगादगाज्जयम् ॥ ३४ ॥

तनुरस्ति कटीति या श्रुतिः
किल तस्याः किमु साऽपि कीलिता ।
अवलम्बमनाप्य यत्स्वयं
कलकाञ्ची स्खलितं द्रुतं दधौ ॥ ३५ ॥

निनदे मम कामकार्मुका
रवभाति तनुते नतेक्षणा ।
इति किं किल किङ्किणीगणं
क्षिपती तद्रसना घनाध्वसत् ॥ ३६ ॥

तनु तनूर्विरहादधिकं तनु-
र्मम धुरं विधुरं विसहेत किम् ।
इति तदूरुयुगं युगपत्कृशं
मलिमकैतवकश्मलभागभात् ॥ ३७ ॥

शशिकराहतिनीरसनीरज-
द्वितयविश्रुतितच्चरणद्वयम् ।
तरलवमँजलच्छलतो जहौ
रुचिभरं रुचिरं किमु निर्भरम् ॥ ३८ ॥

हृद्भुवः किल कलम्बकदम्ब —
प्रक्षतेन तनुतां तनुतां सा ।
तत्र न व्रणगणः स्फुरितो य—
त्तस्य तत्किमपि काण्डकदद्वयम् ॥ ३९ ॥

हृच्छयः क्षितिरक्षितसिद्ध—
स्तस्य मार्गणगणोऽपि तथैव ।
तद्वरं न विततान विभेदे
दृश्यतां मृगदृशः शतशः सः ॥ ४० ॥

विस्फुरद्विरहग ढगूढपादं
दशनादिव गतास्ततां गताम् ।
हन्त पर्युषितमल्लिमाल्यव—
त्तत्तनुर्व्यतत शुष्कशुभ्रताम् ॥ ४१ ॥

आचितेव चिरनित्यनिष्पत—
त्पुष्पबाणशरशुभ्ररेणुभिः ।
पतदद्भुतमुदास तत्तनुः
शैत्यवत्यपि न शैत्यमाप यत् ॥ ४२ ॥

चिरमान्तरसंचरस्मर—
ज्वरकीर्णं किमु भूतिमायुधम् ।
विरसा हृदये दधार सा
परकर्पूररजो व्रजोपधेः ॥ ४३ ॥

पुरतो विरहोरगच्युतां
शितलालां बहलां वत्तद्वपुः ।
अथ शुष्कतया स्मरोदधेः
सिकतां वाकृत चन्दनद्रवम् ॥ ४४ ॥

उरसिजान्तरसान्द्रवृषन्मद —
प्रकरकैतवतो वत सा दधौ ।
हृदयसोदयदर्पकदीपतः[1]
कलिलकज्जलजालमिवोत्थितम् ॥ ४५ ॥

---

1. Ms. also reads दीपजं ।

निजबधोद्यमदुष्कृतजातजाः
कुसुमकार्मुकदुर्यशसां ततिः ।
बहिरुरस्ततराः किमुरःस्फुर—
न्मृगमदोत्करकैतवतोऽकरोत् ॥ ४६ ॥

अन्तरुन्मथनमन्मथनाम्प्रोद्गलद्गरभरं हृदि तन्वो ।
आवहद्विरहवाडवधूमभ्रान्तिपोषणपृपन्मदद्म्भात् ॥ ४७ ॥

सङ्कुलोऽशकलकुङ्कुमपङ्कः संहितोहिततया पोतयाधात् ।
हृद्दरीपरिसरन्मदनाग्नेरुन्मिलत्कलिलकीलकुलत्वम् ॥ ४८ ॥

कामकाण्डकषणक्तहिङ्गुलभ्रान्तिमातनुत पीनत्रजः[1] ।
माविनीहृदि वियोगभोगिनो मूर्द्धवर्द्धिमणिदीप्तिबुद्धिदः ॥ ४९ ॥

रागरज्जुरविरश्मिराजितां विप्रयोगशिखिनः शिखालिताम् ।
वोथितां च दवथुस्वरु[2]त्विषां पीतनावलिरवाप तद्धृदि ॥ ५० ॥

हृदये हृदये शयेभराट्कबलादुद्गलितं वहिः किमु ।
समलक्षयत लक्षशस्तया निहितं मञ्जुमृणालमण्डलम् ॥ ५१ ॥

हिमता विरहामता ततः शितिमोद्योत उदेति मे फलं ।
इति शुष्यति शुग्भरात्पुरा किमु तस्या हृदि संविशद्बिसम्[3] ॥ ५२ ॥

दवथुमर्मरमम्बुजमञ्जसा कषणचूर्णितपर्णमितःस्ततः ।
मृगदृशो बहुशो निहितं हृदि स्वभवमुर्मुर[4]भावमुपाददे ॥ ५३ ॥

---

1. कुङ्कुमसमूहः ।
2. शतकोटिः स्वरुः शम्भो दम्भोलिरशनिर्द्वयोरित्यमरः ।
3. Ms. also reads संविड्विशम् ।
4. मुर्मुरस्तु तुषानलैरित्यमरः ।

दलितनीरजराजिरजोव्रज-
च्छलत आदिततद्धृदयस्थलम् ।
प्रविसरद्विरहज्वलनज्वल-
त्कणगणं परित परितप्तिदम् ॥ ५४ ॥

एष चित्ररसकन्दलकन्दः
सुभ्रुवः प्रतपनोष्णकरेण[1] ।
यज्जगाम नलिनं मलिनत्वं
ग्रीष्मशुष्कनवपल्लवरूपम् ॥ ५५ ॥

तत्तदा समुचितं समुदोतं
म्लायते स्म सजलं जलजं यत् ।
आकलय्य किल पद्मलनेत्र्या
विग्रहं खलक्षितं तततापम् ॥ ५६ ॥

हृत्सरन्मकरकेतुकेतनो-
द्दंशनेन शतभित्ततामिव ।
आददे सरसपद्मिनीच्छद-
स्तत्र तापतपनातपद्विती ॥ ५७ ॥

पञ्चसायकनिशातसायक-
प्रोद्यतव्रणविलासमादितम् ।
नूतनं तदुरसा निरन्तरं
पद्मिनीकिशलयं लयं गतम् ॥ ५८ ॥

हृदि शैवलवल्लिमाप सा
नवसंवर्त्तिकया समन्विताम् ।
परिकोपकषायतायतां
किमु कन्दर्पकटाक्षलेखिकाम् ॥ ५६ ॥

---

1. Ms. reads प्रतपतोष्णकरेण ।

जलमञ्जुलपद्मपल्लव—
प्रवलाशाधवला ललास सा ।
व्यसने सरसीव सारसी
स्मृतिभूशाकुनिकेन विक्लवा ।। ६० ।।

अथ सखीं सुतनुः सुतरां तनुः
करुणलावणसागरसाप्लवाम् ।
विततलीतकलेशसहोल्लस—
ल्ललितवर्णमभाषत भाषितम् ।। ६१ ।।

स्मरणभूगणकौ गणयत्यदो—
भवति त्रुट्यपि कल्पशतं मतम् ।
विरहिणीं प्रतिपत्यनुसारिणीं
प्रति तु तद्विपरीतमुदीरितम् ।। ६२ ।।

शुद्धिसाधिमसमृद्धतयास्ते
कोमलेन कमला कमलाङ्के ।
कामदावदवनेन कदाचि-
त्किं तु कान्तवियुता कुपिता सा ।। ६३ ।।

किं वदामि दवथुं विरहोऽसा-
वाशुशुक्षणिरहो नव एव ।
नाशु भस्मयति हृत्परितापं
स्वाभ्यजोगपदपि स्वत उच्चैः ।। ६४ ।।

किं करोमि सखि हा सुधाकरो
दुर्नयं मयि महत्करोति किम् ।
नैष किं नु मनुते दयानिधे-
र्नेत्रपांशमहिमस्य[1] निष्कृपः ।। ६५ ।।

---

1. Ms. reads °र्नेत्रतांश°

मन्द एष तुदतु द्रुतं मरु—
　　त्काल एष कलकोकिलश्च माम्।
शौचतः सुमनसो हसन्नसौ
　　यज्ञराडपि निहन्ति हन्त किम्॥ ६६॥

वहतेऽहह चन्द्र इत्यदः
　　पदमिन्दोः खलु रूढतां मताम्।
कुरुते कथमन्यथा व्यथाः
　　सगरोद्गारवदुद्धुरैः करैः॥ ६७॥

वहते वहलं वियोगिनी—
　　जनतातुञ्जनजातदुर्यशः।
च्युतलुञ्छनलाञ्छनञ्छला-
　　द्रजनीजानिरयं हृदि स्वयम्॥ ६८॥

विधुर इत्युदितात्पदतः कदा—
　　चन चकार रकारविलोपनम्।
विधिरनुच्चरणाच्चिरवार्द्धकौ
　　विधुरयं सकलैः किल तत स्मृतः॥ ६९॥

ध्रुवमलीकवता जगता वता—
　　मृतकरः कथितः क्षणदाकरः।
मयि भवत्यदय यदयं पुन—
　　र्मृतकरः स्वकरैः सगरैः शरैः॥ ७०॥

भीमताननमता ननु युक्तं
　　भीममाश्रितवतः शितभासः।
भूतदेह इव दाहिहरारे—
　　रेष तद्भयचयं तनुते नः॥ ७१॥

भर्गभालतललोचनवह्ने—
दाहिका भृशमशिक्षत शक्तिः ।
अन्तिका सितनया सितभासा[1]
दह्यतां बहुतरं तरसा तत् ॥ ७२ ॥

कालकूटकुलतोऽप्युरुः शशी
नेश्वरस्तदमुमत्तुमीश्वरः ।
मूर्ध्नि साध्वथ दधार साध्वसा-
ल्लेशमात्रमतिमात्रमादृतम् ॥ ७३ ॥

अर्णवाब्धिकफवार[2]कर्बुरः
कालकूटवट एष चन्द्रमाः ।
अन्तरालकलितां ततः श्रितः
स्वां रुचीमलिमसोमलीमसीम् ॥ ७४ ॥

जडता स्फुरिता यदा तदा
विबुधत्वं विलसेद्विधौ कुतः ।
अत एव वितत्य तां क्षणं
सततं दाहमयं तनोति नः ॥ ७५ ॥

शशिनो हिमधाम नाम त-
त्सखि कोषे किल कीलय द्रुतम् ।
अमुना किमु नावकल्पते
मयि हन्ताहिमधामता मता ॥ ७६ ॥

अहह मोहयितुं भुवनं मुहु-
र्विषदिता कुसुमाशुगमायया ।
न विषमण्डलिका विधुमण्डली
यदि तदा तमसा किमवामि सा ॥ ७७ ॥

---

1. चन्द्रेण । 2. अब्धिकफः फेनः ।

सततमेव विधुं तु विधुंतुदः
करुणया निरुणद्धि कथं न सः।
इह किमेकत मे कलितं शुभं
विरहिणो बहवः किमु कुर्वताम् ॥ ७८ ॥

किं कृतं मुरहरेण च राहो-
रच्छिन्नच्छिर उदारमयं यत्।
न हते शशिनि तेन वियोगि-
स्त्रीवधोऽतति परंपरयाऽमुम् ॥ ७९ ॥

चन्द्रमुद्ग्रसति भास्वति राहौ
तं शरव्ययति पञ्चशरः किम्।
तेन तस्य रिपुमारणमान्द्ये
नास्ति दोष इति मां प्रतिभाति ॥ ८० ॥

इत्थमातनुत जातपल्लवं
सा निशाकरविनिन्दनाङ्कुरम्।
हृद्गतं रिपुमपि द्रुतं ततः
केलतीपतिमपावदिष्ट च ॥ ८१ ॥

काम निष्करुण किं करोषि रे
यद्दहस्यहह मां तवाश्रयम्।
आश्रयाश इति नाम नामत-
स्त्वबाह्विबह्वि विबुधादचोरयः ॥ ८२ ॥

शुचिरस्ति दृगीश्वरस्य सा
स्मर या त्वां दहतिस्म सस्मयम्।
दयया तव जीवदा तु या
ननु दोषाकर एव हन्ति सा ॥ ८३ ॥

तव दाहदिने मनोजने[1]
यदि वास्थास्यमहं तदा मुदा ।
नयनाब्जमधास्यमुद्धुरं
भवदङ्गाग्निरविच्छविस्फुटम् ॥ ८४ ॥

सदृशनामतया त्रिदशः स्फुटं
सहजमित्रमितीव रुषा स्मर ।
चिरमविग्रहतां दधदप्यहो
भजति विग्रहमत्र भवे भवान् ॥ ८५ ॥

अतनुता तनुते किल मन्मथ
प्रमितमर्थममूर्त्तितया तव[2] ।
कथमयोगिवधूवधकर्मणि
प्रकटमूर्त्तिरसि स्फुरसि स्फुटम् ॥ ८६ ॥

मारमारकहराद्यनलेन
प्रेततां गतवतः स्तवयुक्ता ।
पूर्वतोऽपि कटुता वितताप—
त्पापिनां प्रकृतिरीदृगुदेति ॥ ८७ ॥

जायते मदन नाम काम ते
श्लेषनार्थकतयैव सार्थकम् ।
अन्यथा कथमहो मनागपि त्वं
करोष्यहह हर्षणं न मे ॥ ८८ ॥

त्वां प्रदह्य शिवतां मतां दधे
क्रूरमारगिरिशः प्रजीव्य च ।

1. मनसि जनिर्जन्म यस्य स तथा । तस्य सम्बोधने । 2. Ms. also reads ततु ।

पिष्टपेषु हरतां रतां पुनः
सोऽपि तेन तमसाकुलः किल ॥ ८९[1] ॥

कामस्येतिप्रसरदयशोनाटिकाया नटीत्वं
सा निन्ये यद्वचनरचनां तेन कोपेन तेन ।
वाढं विद्धा कथमपि दधात्रित्थमद्धं समस्या—
वाक्यं सख्या करुणलहरीधोरणीधौतवाण्या ॥ ९० ॥

धत्ते सदा गतिरसौ सुरसौघभावं
धत्से कथं कथय कष्टमिनो वयस्ये ।
हन्ता सदागतिरसौ रविसौघभावं
मय्यातनोति नितरां सखि किं करोमि ॥ ९१ ॥

अयमिह पवनो वहत्यमुष्मा—
त्किमिति बिभेति भवत्यये वयस्ये ।
सखि न पवन एव नोवलानां
वधकतयैष वृथा कृथा गिरो मा ॥ ९२ ॥

सचन्द्रांशुकसुकरप्रकामभावो
भातोऽयं प्रियसखि माधवोऽत्र मा भैः ।
सचन्द्रांशुकसुकरप्रकामभावो
नैवायं स इति वितापमापमालि ॥ ९३ ॥

विरहदहनदाहविह्वलत्वा—
त्तव हृदकृष्णविहारमद्य सद्यः ।
सखि किमु करवै नितान्ततान्तं
हृदपि न कृष्णविहारमाहताहम् ॥ ९४ ॥

---

1. The Ms. reads the number ninety and accordingly tbe subsequent numbers are also mentioned in the Ms.

इति मृदु निगदन्ती तान्ति दीनानना सा
सपदि भृशममांक्षीन्मंतुमोहान्धपङ्के ।
अथ करुणरसोर्मीपूरकिर्मीरणाद्रौ
व्यतनुत ललिता तत्सान्त्वनार्थोपचारम् ॥ ९५ ॥

शवालवल्लरिघनव्यजनेन वारि-
वर्षेण वेल्लदमृणालमृणालमाल्यैः ।
अन्यैश्च शैत्यकरणैः करणैस्तदीयै—
र्नास्फारि किन्तु कृति कृष्णकथाऽमृतेन ॥ ९६ ॥

श्रीकृष्णं कलय स्फुरत्तररसं शृङ्गाररङ्गार्णवं
त्वत्पत्पकंजराजसेवि सखि तत्पाण्यम्बुजं च स्पृश ।
इत्युच्चैर्ब्रुवती मुहुर्बहुखरं श्वासं भृशं मुञ्चतो
तामाश्वासयदाश्रसह्यविरहज्वालां वयस्याथ सा ॥ ९७ ॥

सशपथमथामन्दावृन्दावनाश्रितदेवता—
मनु निजसखीं दूनां दीनां स्मरेण समर्प्य सा ।
ललितलपितन्यासा श्वासात्तयाधृतजीवया
कथमपि मुहुर्नुत्ता यत्ता जगाम हरेः पदम् ॥ ९८ ॥

तस्याः पादाम्बुजन्मप्रवलितमजनि स्पर्द्धया सार्द्धमस्याः
शार्कं कामेन रंहः समतनुत समं चेतसा चौदलस्यत् ।
तत्सङ्गात्तुङ्गरङ्गासरणिरपि मुदा वर्हिणी मङ्गलोद्य-
न्नादव्याजेन नूनं विरहविजयिनीं व्याञ्जिजत्कार्यसिद्धिम् ॥ ९९ ॥

पातिव्रत्यसुधासरित्प्रसरभूः श्रीनिम्बदेवोगिरां
जीवातोर्यमजीजनज्जनमतं श्रीमच्छतंजीवतः ।
तेनेराभिरनादिना विरचिता या केलिकल्लोलिनी
तस्यामेष तरङ्ग आदितरसात्पूर्वानुजः पूर्णताम् ॥ १०० ॥

श्री वार्षभानवीविप्रलम्भो नाम ॥

तृतीयस्तरङ्गः

अथ पथि पथिकार्थसिद्धिवीजं
जलकलशं कलयांचकार सेयम् ।
खरकरतनयान्तरप्रदेशे
मधुमधुराम्बुजकोषकैतवेन ॥ १ ॥

उन्मीलद्भ्रसलविनीलचूतपत्रं
सद्रेणुस्फुटपटवासवासवासम् ।
साऽदर्शद्रसपुषपुण्डरीककोषं
प्रत्यङ्गप्रवलविलेपपूर्णकुम्भम् ॥ २ ॥

पाकोज्ज्वलं पृथुरसालफलं विलोक्य
[1]कर्पूरवारिरुहकोरककोमलाभम् ।
एषा पुनर्जननवाल्यपरस्परस्य
केलीकृते कनककन्दुकमूहते स्म ॥ ३ ॥

वनप्रियश्रेणिरुतिस्तुतिप्रियं
वदान्यमुच्चैरभिमान्यमुर्जितम् ।
रसाकुलं कल्परसालमाश्रितं
फलं फलं मूर्त्तिमिव व्यबोधि सा ॥ ४ ॥

सा मार्गजं मार्गणभद्रमार्ग—
पान्थं हृदाऽमार्गत कायमार्गम् ।
कल्पद्रुमाणां वशगद्रुमाणां[2]
वनं सुतानां वनदेवतानाम् ॥ ५ ॥

---

1 हेमकर्पूरं

2. Ms. reads ० द्रमाणां ।

अशकलमनुकूलमङ्गलार्थं—
प्रकटनवाक्यमिव ध्वनिं दधानम् ।
इयमससरदक्षिदक्षिणस्यां
हरिति[1] मुदा हरिणव्रजं व्रजन्तम् ॥ ६ ॥

मदसान्द्रतारतरषड्जरुतैः
प्रियवावदूकमिव भावभरात् ।
घनशाड्वले घनधिया पुरतः
कृतनृत्यमैक्षत मयूरमियम् ॥ ७ ॥

सकलं कुशलं किलेत्यवेत्य
स्फुरती सा कृतचित्तवृत्तनृत्या ।
विविदे सुपथा यथार्थनाम्नः
प्रियसख्या दयितस्य तस्य पार्श्वम् ॥ ८ ॥

अविरलदलमाधवीमधोऽधः
स्वतनुलतां ललिताऽथ निन्हुवाना ।
हरिचिरचरितं विवोद्धुकामा
परिजपति स्म परं विचारमन्त्रम् ॥ ६ ॥

कृष्णेन्दोरपिरतराधिकाऽनुरक्ते—
र्जिज्ञासुर्विरहतमो विराद्धतां सा ।
अस्तत्वादुपचितमन्दतां नितान्तं
तत्रेतिप्रलपितचन्द्रिकां[2] प्रपिप्ये ॥ १० ॥

हा हा करोमि किमहं विदधद्विमोहं
कुप्यन्नसूययति [3]कामपरेतराजः ।

---

1. दिशि ।
2. इति वक्ष्यमाणप्रलोपचन्द्रिकां ।
3. रूपकं ।

कान्तावियोगदहने गहने प्रदह्य
मां चर्वितुं प्रवलते च बलात्किलायम् ॥ ११ ॥

रे क्रूर स्मर गर सागर स्फुटं त्वां
किं वाऽहं तदपवदे विदूनदीनः[1] ।
यद्गाढं[2] तुदसि मनो मनोभवोऽपि
प्रव्यक्तं निजकुतनूजताप्रतीत्यै ॥ १२ ॥

रे मन्दगन्धवह किं वहसे विचारं
कामस्य दास्यमयसे समयस्त्वयायम् ।
षमाक्षिवह्निसहकारितया तयाऽस्य
स्वस्वामिनोऽप्यपकृतौ यदभूः कृतौजाः ॥ १३ ॥

मरुदत्र मरुत्तयाऽर्च्यसे विषयाम्भोभ्रमिभिर्जडैर्जनैः ।
दधदस्तपतां यदाहसे मधुगन्धं मुखतस्त्वमाश्रितः ॥ १४ ॥

अहरत हरिरिति नाम कृतान्ताद्वत रतिपतिरिह मारतया यः ।
मधुपर मधुकर निश्चयरित्वात्तदसि हरसि वरमेव ततोऽपि ॥ १५ ॥

तदुचितं तदले तव यन्मम प्रहरसे हृदयं सततं ततम् ।
इह शिलीमुखता मुखरैः स्वरैः स्फुरति कण्गकटोः प्रकटाहि ते ॥ १६ ॥

रे कालकोकिल कलस्वरदिग्धबाणैः
कर्णं मदीयमदयं यदलं भिनत्सि ।
स्थाने तदेतदतिकापकषायदृष्टे—
र्दुष्टस्य ते परभृतस्य मधूत्कटस्य ॥ १७ ॥

चूतमञ्जरि करोमि किं मरुद्रेह्लितात्वमुदितालिमालिका ।
मन्मथस्य खरतारधारिका संभवस्यपकृपाकृपाणिका ॥ १८ ॥

वासन्तीत्यहह वसन्तसंप्रसक्तं सम्बन्धं न खलु विमुक्तयातिमुक्ते ।
सौजन्यं रसमयि माधवे मयि त्वं मा धत्से कथमिह माधवीति मुग्धे ॥ १९ ॥

---

1. विदूनेन विरहेण दीनः । 2. गाढ़वाढ़ द्रुढानि चेत्यमरः ।

किं ते वसन्त बिनिवेद्यमवद्यशील
संतन्वते मधुतया मधुपान्मदान्धान् ।
आः पाप तापयसि मां मम ते च मैत्रीं
संत्यज्य माधवतया समनाममावात् ॥ २० ॥

रे माराद्याविरहि रिपवो विप्रयोगाग्निकन्दो—
यैन्मे स्वान्तं व्यथयथ भृशं तद्वरं वः परेषाम् ।
सा जीवेशा यदुत हृदयाभ्यन्तरस्थापि दुःस्था
साद्धं स्वेन प्रविचरति मे हन्त तान्ति नितान्तम् ॥ २१ ॥

कान्ते न दोषविषयस्तव चित्तवृत्ते—
र्या जह्नुजा मम मनोजलधेरभिन्ना ।
कौटिल्यकौशलमिदं त्यजनं तु नेत्र—
नीलोत्पलस्य किल तस्य मलीमसस्य ॥ २२ ॥

त्वल्लोलदृष्टिभरसारघसारिणी सा ।
मत्प्रेमनव्यनवनीतयुता यदासीत्
आस्वादनेन तरसा तनुते तदेव ।
प्राक्पूर्णघूर्णघनघोरतरं प्रमोहम् ॥ २३ ॥

कान्ते ध्रुवं कामकलम्बभावात्सांमुख्यमेत्यान्तरमेषि मेऽसि ।
कथं पुनर्नास्त्रसहस्रसंख्यैर्धारैर्मयीयैर्मयसे न रागम् ॥ २४ ॥

मदग्रतोऽसि स्फुरसि स्फुटं य—
त्सहस्रशस्तत्सहसा क्व घस्रे ।
कलाकुलाध्यापककामदेवा—
च्छित्वां वपुर्व्यूहकुलेऽ वहत्स्वम् ॥ २५ ॥

दिग्भित्तिषु स्फुरसि चित्रमतीव चित्त-
मेकापि कापि शतशः स्मरशिल्पिनस्त्वम् ।
तत्रान्तरे कथय कासि निजानजाने ।
प्राणेशिनाबकलयस्व किलापलापम् ॥ २६ ॥

कान्ते यद्विकटकटाक्षपाशवल्या
मां मर्मण्यनवधि बन्धनं निनेथ ।
तत्किं नो नखरदनेन खण्डयित्वा
चण्डं सापराधाय मे ददासि दण्डम् ॥ २७ ॥

हा कान्ता कलयति किं निदानदीनं
मानं मे नय ललिते प्रसादमेनाम् ।
एतेन प्रियविधिवस्न[1] वर्षणेन
क्रिणीहि त्वमसुमहामणिं मदीयम् ॥ २८ ॥

वैक्लव्यकन्दलितमेतमथ प्रलापं
कृष्णस्य सा श्रुतिपुटीमधुसाधुकृत्य ।
संबोधनादिव शिवेन निजेन नाम्ना
कुञ्जान्तराद्बहिरभूत्तरसा तदग्रे ॥ २९ ॥

हरिमथ सुमुखो सखीमुखेन्दोः
श्रमगलितामृतपानपीनदृष्टिम् ।
शुभमिदमति चिन्तयन्तमन्तः
किमपि चचार चिरस्य सौमनस्यम् ॥ ३० ॥

तां मनोरममनोरथसिद्धेर्देवतामुपगतामिव बुद्ध्वा ।
मोदगद्गदमिदं गदति स्म प्रेमधामलज्जितं लपितं सः ॥ ३१ ॥

स्वागतं सखि तव स्ववयस्या विद्यतेऽद्य न कथं सहराधा ।
किं दधार विषमेषुरसेषु श्रद्धया भृशमसाववसादम् ॥ ३२ ॥

इति तस्य वचो विचित्रभावं ललिता साधु निशम्य सम्यगूचे ।
विषमेषु रसेषु ते विलोकान्न कथं सास्पृहयाऽस्तु सावसादा ॥ ३३ ॥

---

1. वस्नं न वेतने मूल्ये वसनद्रव्ययोरपि ।

त्वां यद्विलोक्य तरुणी हरिणो हरारि
व्याधस्य मार्गणगणव्रणिता बभूव ।
खेदं तदेव तरसा विरसा दधाना
नानाविषादविषवीचिषु संममज्ज ॥ ३४ ॥

तत्र कृष्ण वियोग[1]कृष्णपक्षे बत सा संतमसान्तरे[2] निलीय ।
चरमाविधु[3] लेखिकेव खिन्ना रुचिमुच्चैर्विजहाति हाऽतिमात्रम् ॥ ३५ ॥

कुसुमाशुगनागनिर्गलद्बहलप्रौढ़ लाहलभ्रमम् ।
वहतेऽवहतेन्द्रियाण्यवीरियमैरेय[4]उदारसौरभे ॥ ३६ ॥

स्मरणेन समाधिमाधितान्तः परपुंसस्तव यद्वियोगिनीयम् ।
लयमाप्तवतीव ताशनादिव्यवहारं न बहिस्ततो विभर्त्ति ॥ ३७ ॥

आत्मदारसमनामनि[5] तस्यां नाद्रथमाप विबुधोऽपि विधुर्यत् ।
तत्कुतस्तु कुशलं कलयन्तामुन्मदामधुरसैर्मधुपाद्याः ॥ ३८ ॥

अहो त्वदाशाविशतन्तुना भृशं यियासुमेषाऽसुरुरुं निरुन्धती ।
चिराय दुष्वायत एव मन्त्रिणस्तव[6] स्मरन्ती स्मरभूतभीषिता ॥ ३९ ॥

तन्वङ्ग्या कलिता वियोगदहनज्वालेव या या दशा ।
तां कस्मात् प्रभवानि वा निगदितुं कारुण्यवारांनिधे ।
तस्याः स्वच्छतया त्वयि प्रवलते यत् संप्रतीह प्रति—
च्छाया तत्सहसैव वेत्सि सततं तावत्स्वयं कान्तनाम् ॥ ४० ॥

---

1. रूपकम् ।
2. ध्वाेणेऽवतमसं तम इत्यमरः ।
3. Ms. also reads चरमाद्विधु ।
4. कश्यं कल्यं तथा मद्यं मैरेयकापिशायनम् ।
5. राधा इति यद्यपि अनुराधानक्षत्र नाम वर्त्तते ।
अत एव आत्मदाराणां, अनुराधायाः समं नाम यस्याः सा तस्यां ।
6. अधिगर्थदयेषां कर्माण । एषां कर्मणि षष्ठिः स्यादिनि षष्ठी ।

तत्तस्यारतरुचिभिः क्षमाहिमांशो
म्लानत्वादसुकुमुदं मुदं नयस्व
शस्यात्यः घनरसवृष्टिभिर्घनस्तत्—
प्रक्रान्तं क्षणिशमहो करोतु कान्तम् ॥ ४१ ॥

इत्थं तदुल्लसितभाषितचन्द्रिकाभि-
र्दध्रे द्रुतिं द्रुतमयं हिमकान्तिकान्तः ।
सुस्वादुतालसितशीतलशीलशालि—
युक्तं तदित्युदितवागमृतं मुमोच ॥ ४२ ॥

कामो यन्ता कुवलयदृशो यत्कटाक्षाङ्कुशेन
स्फीतं मर्मण्यकृतवत मे हृत्प्रभिन्नं प्रभिन्नम् ।
अन्तर्मूर्च्छाचित इव ततश्चेष्टितं कुत्रचिन्न
द्राक्तच्चिन्ता निविड़निगडव्रातबद्धोऽयमेति ॥ ४३ ॥

दृशोर्द्वयं मम सुदृशं प्रति स्वयं
प्रचुम्बनादय इव चुम्बकं मणिम् ।
निरन्तरस्फुरदनुबिम्बसंततौ
समं ततो दिशि दिशि तत्र लीयते ॥ ४४ ॥

विरहगहनदहनघनघनतति—
मदनकदनविषलसदमृतनदी ।
असरणकरणवननवमधुरुचि—
र्मम हृदि विहरति निजरतिभुवि सा ॥ ४५ ॥

दशति क्षणं यदि पिपीलिकाऽपि द्रुतं
कुरुते तदा न कियतीमतीव व्यथाम्[2] ।
मदनो महामदकलः[3] पुनर्मे हृदि
प्रसभात्प्रसर्पति सदा रयाऽजृम्भया ॥ ४६ ॥

---

1 पीड़ावाधाव्यथादुःखमामनस्यमित्यमरः । 2. मदोत्कटो मदकल इत्यमरः ।
मदन एव महामदकलः महामदोद्धतहस्तीति व्यस्तरूपकम ।

सुदृशो विरहाग्निविह्वलत्वा—
च्च्युतदत्ताक्षरवाचिता तता मे ।
इति कामपदे मकारमस्य[1]—
न्ननिशं वच्मि निरन्तरं लकारम् ॥ ४७ ॥

स्याद्विन्दुच्युतिमिषतो मुखामृतानां
सा विन्दुच्युतिरतिशिक्षिताप्रियायाः ।
कान्दर्पं सृजतु यया प्रतापसूर्य्यं
का दर्पं मयि रसमग्नतां गता सा ॥ ४८ ॥

अहमहह मनोजं नास्मि निर्जेतुमैक्या—
त्कलितसुतनुपक्षस्तं विजेस्येऽधुनाशु ।
विरहदहनकन्दौ मय्युदश्चद्दयाया—
स्तव तदिह महत्ता मञ्जरीस्तात्फलाढ्या ॥ ४६ ॥

इत्युक्त्वा विरमन्तमान्तररसं साक्षाद्वमन्तं स्मितैः
श्रीकृष्णं वरवर्णिनी प्रियकथासंवर्णिनी साऽवदत् ।
सौम्यो यामनिकाममुज्ज्वलकलाकल्पोज्ज्वलः स्ताद्भवान् ।
राधामाधवयो रती रतिपतेस्तात्कीर्त्तिनद्यद्रिभूः ॥ ५० ॥

राधामथैत्य तरसा रसकान्तकान्त —
वृत्तान्तचन्दनचयेन विलिम्पती सा ।
शृङ्गारसागरसुधाकरलेखिकाया —
स्तस्याः[2] सनर्मनिरमात्प्रतिकर्म कर्म[3] ॥ ५१ ॥

नवरसभरधोरणी धुरीणां
द्रुतघनरञ्जनगञ्जनप्रभाणाम् ।
पदजलजयुगे दधार राधा
विलसदलक्त[4]मिषात्समुल्लसन्तीम् ॥ ५२ ॥

---

1. अमुद्रूपणे, शतृ, दिवादित्वाद् यन ।
2. क्रीडाखेला च नर्म चेत्यमरः ।
3. आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनमित्यमरः ।
4. राक्षा लाक्षा जतु क्लीबे यावोऽलक्तो द्रुमामय इत्यमरः ।

तत्पादाङ्गुलिकलधौतटङ्कपालि—
प्रोत्कीर्णान्तरमिव कामकर्मिलेव ।
नूनं तन्नखजितमुज्ज्वलर्क्षजालं
बभ्रासे शशिमणिस्फटिकामिषेण ॥ ५३ ॥

द्विगुणितविनतं तदङ्घ्रिकञ्जे[1]
विशमिव हीरकनूपुरं परार्द्धम् ।
मदननटनकांश्यतालनाद—
भ्रमकरसिञ्जितवञ्चितं बभासे ॥ ५४ ॥

वमता रुचिनिर्झरं परं किं
घनहारिद्रनवद्रवच्छलेन ।
अवितर्कितपीतपट्टभासा
भृशमस्या जघनद्वयेन लेसे ॥ ५५ ॥

विद्युद्विलासकलनापटुपीनपट्ट—
ग्रन्थिर्ललास सुदृशः सनितम्बबिम्बे ।
आक्रष्टुमच्युतमनोजमदनेन बन्दी—
कर्त्तुं च पाशनिगडौ कनकं कृतो यः ॥ ५६ ॥

प्रथमविषमवैशसद्वयेन
प्रणयकृते कृतिना स्मरेण दत्ता ।
विजयिकनकपाशवल्लरीव
व्यतनुत तत्कलमेखलाविलासम् ॥ ५७ ॥

अदसीयनाभिसरसीतिरःप्रोत्सर—
त्कनकाब्जिनीव घनकाञ्चिवल्ली बभौ ।
धृतचित्तहारिहरिरत्नभृङ्गोदरं
स्फुटमौक्तिकस्तवकपुण्डरीकं श्रिता ॥ ५८ ॥

---

1. नतङ्घ्रि also in the Ms.

2. मृणालं विशमित्यमरः ।

इदमीयगभीरगर्भनाभीकमलाकारमहेषुधौ स्मरस्य ।
व्यरुचन्मृगनाभिबिन्दुवृन्दच्छलतः संहितबाणबाणधारा ॥ ५९ ॥

मनोभुवः कुतुककृते प्रकल्पिता क्रमात्त्रिधा तनुतनुयष्टिवेष्टिता ।
सुचन्दनद्रवनवपल्लवश्रिता मृगीदृशो व्यलसदलं वलीलता ॥ ६० ॥

यदि नवरविरश्मिपल्लवित्वं
भजतु तमिस्रलता तदैतुतत्वम् ।
उपमितिमतिपृक्तकुङ्कुमाया
वरतनुनूतनरोमरेखिकायाः ॥ ६१ ॥

नवकुङ्कुमपालिपल्लवाली
विकसच्चन्दनबिन्दुपुष्पवृन्दा ।
सुतनूस्तनशैलरणनाभि-
द्रवपत्रावलिवल्लिरुद्बभासे ॥ ६२ ॥

एणीदृशो बृहदुरोजमनोजराज-
लीलामहीध्रगुरुगैरिकधारिकात्वम् ।
संसक्तहारझरभारविभक्तरागा-
नुत्नद्युरत्नरुचिरञ्जनराजिराप ॥ ६३ ॥

प्रथितौ तदीयकुचपर्वतौ प्रोन्नतौ
रतिकामयोः कनककेलिहर्म्यौ न चेत् ।
कथमत्र कुङ्कुमविचित्रपत्रावली-
कपटेन पट्टपटवल्लीरभात्तदा ॥ ६४ ॥

वक्षोजाम्बुजकलिकाकुलालिपाली[1]
विश्रान्ति किल कलयांचकार तस्याः ।

1. वक्षोजाम्बुजकलिकाकुलस्य, अलिपालिविश्रान्तिम् ।

उन्मीलद्विमलपृषन्मदस्य लेखा
कामार्थी किमु रतिनीलकञ्जमाला[1] ॥ ६५ ॥

रतिाङ्गरणे रतिस्मराभ्यामधिरूढ़ौ किमहो नियुद्धयोधौ ।
इतरेतरमाहितोपगूढ़ौ मकरौ हृद्यकरोद्विशेषकैः सा[2] ॥ ६६ ॥

नवनिर्मलनीलरत्नमुद्रा
वलिभृङ्गालिरलंचकार तस्याः ।
करयोः कपटेन कामक्लृप्ते
कनकान्तर्गतपद्मरागपद्मे ॥ ६७ ॥

कामस्य तत्करसरोरुहरोपरोपि
सल्लद्यमण्डलमतिं कटकं चकार ।
शोणोपलोपज्ञसदङ्गदयष्टिका च
तद्बाहुवल्लिनवपल्लवतां ततान ॥ ६८ ॥

नवविमलमृणालश्रीहरःसूत्रिका[3] त-
द्गलकुहरगलन्ती सीधुधारेव रेजे ।
अतनुरतनुत प्रालम्बिका च स्फुटं त-
द्धृदयकनककञ्जावृत्तनालाविलासम् ॥ ६९ ॥

रम्यैकयष्टिगणमाणवकाच्छगुच्छ[4]—
गुच्छार्द्धगोस्तनसचञ्चनचन्द्रिकौघः ।
तत्कण्ठपञ्जरविहारिगिरा मरालि-
चञ्चुच्युतस्फुरितदुग्धधियं दधार ॥ ७० ॥

---

1. रत्यारतु प्रियायाः नीलोत्पलमाला ।
2. शतरचनाभिः ।
3. स्वर्णैः प्रालम्बिकाऽथोरः सत्रिका मौक्तिकैः कृता ।
4. वालस्तु स्यान्माणवकः ।

श्रवसोः सविशोधशोणरत्नस्फुटताटङ्कयुगेन भूषिता सा ।
रतिकान्तकलाविलासलक्ष्म्याः किमु रागोदयलोचनद्वयेन ॥ ७१ ॥

श्रवणमदनतूणमेणनेत्री
मणिमयमण्डनमञ्जुरश्मिनद्धम् ।
अकृत विततकर्णिकाछलेन
प्रकटितबन्धुरबन्धुजीवबाणम् ॥ ७२ ॥

किमपि कनककर्णपुष्पमेषा
विकचकठिल्लकसूनसंस्थितिश्रीः[1] ।
श्रुतिरतिपतिकेलिहेमवल्ली-
स्फुटसुमनोमतिकारणं चकार ॥ ७३ ॥

रतिकामयोरपचिति[2]प्रसादीकृते
कनकार्ककोरकयुगे[3] सवृन्ते युते[4] ।
इयमाप कर्णयुगले प्रकामोज्ज्वले
कलधौतमल्लिकलिकाद्वयीदम्भतः[5] ॥ ७४ ॥

घनरञ्जनद्रवविलेपरञ्जितः
सुदृशो व्यदीपि किल गण्डमण्डलः ।
विदधत्प्रभातउदितं प्रभाकरं
द्युतिसंपदाद्भुतमहोदरिद्रितम् ॥ ७५ ॥

सन्ध्यांशुच्छुरितसुधांशुसर्वगर्व-
प्रध्वंसाध्ययनगुरुर्गुरुर्न कस्य

---

1. Ms. reads संस्थितिश्रि ।
2. पूजा नमस्याऽपचितीत्यमरः ।
3. कनकस्य अर्कपुष्पकोरकयुगे ।
4. संयुक्ते । वृन्तं प्रसवबन्धनमित्यमरः ।
5. कलधौतं सुवर्णेऽपि स्तम्भप्रारम्भयोरपि ।

वाह्लीक[1]च्छविमविभ[2]स्तदास्यविम्बो
लुण्टाकोऽरुणघृणिघृश्रकञ्जलक्ष्म्याः ॥ ७६ ॥

गिरदान्तररागमुत्तरङ्गं किमु ताम्बूलदलद्रवच्छलेन ।
स्वयशः स्मितदन्तकान्तिदम्भादधदच्छं धरति स्म साधरौष्ठम् । ७७ ॥

सरससुरभिसारश्वासधारापतिष्णुं
स्मितसु सरि दुग्धोसङ्गमात्किं विशुद्धम्[3] ।
मधुपमुडुमनोज्ञं कामिनीनासिकायां
कनकतिलकपुष्पे मौक्तिकच्छद्मनाऽधात् ॥ ७८ ॥

सा शोणमीक्षणयुगं सुभगं मनोज-
सव्यापसव्यकरकेलिसरोजयुग्मम् ।
कस्तूरिकाचटुलकज्जलसूक्ष्मरेखा-
नव्यालिपालिकलितं[4] ललितं चकार ॥ ७९ ॥

सुतरामिदमीयचिल्लिवल्ली
स्मरनीलोत्पलचारुचापलेखा ।
घनकुङ्कुमकैतवेन तेन
स्फुटकिंशुककमलं चकार कामम् ॥ ८० ॥

भ्रूवालकोकनदवल्लरिमध्यचुम्बि-
रोलम्बसम्वलितकुट्मलवुद्धिवीजम्[5] ।
सिन्दूरविन्दुमुदितान्तरकुङ्कुनाभिं
तद्भालमण्डलमलं वहलं वभार ॥ ८१ ॥

---

1 वाह्लीको देशभेदे च वाह्लीकं धीरहिङ्गुले ।
अनयोरपि वाह्लीक इति ।

2. भुभृङ्धारणपोषणयोः, लङ्दुङ् ह्वादित्वाद्विरुक्तिः ।
रुस्पृहाङ्माङ इत्यादिना ईकारो ह्रस्वः
गुणेनार, जुग्युजोऽन्त इति तलुक्, रकारस्य बिसर्गः ।

3. शुक्लं ।

4 सैव्यालिपालिः तेन कलितम् ।

5. हेतुर्ना कारणं वीजं निदानं
त्वादिकारणमित्यमरः ।

यतिनियमपटं स्फुटं विभेत्तुं
रतिपतिशौचिक[1]रुक्मकर्त्तरी किम् ।
कुवलयनयनाललाटदेशे—
ललितहिरण्यललाटिका[2] ललम्बे ।। ८२ ।।

परीतथ्या[3] विद्य द्वलितविलसत्पुष्पकरका-
ततान्तः सिन्दूरावलित्रलसपल्लायुधयुता ।
समुन्मीलन्मुक्तारुचिजलकुलं चारुकिरती
व्यराजीत्तद्वेणी नवमधुरधाराधरततिः ।। ८३ ।।

मरकतमणिभास्वत्पुष्पसंभूषितत्वा-
ल्लसदलिसहकार[4]प्रस्फुरत्कोरकाभम् ।
अवहत वरवर्णस्वर्णदुर्वादलोद्य-
त्कनककणिशमस्या[5] वेल्लिता वेणिवल्ली । ८४ ।।

अतनुतनुच्छायां पुष्पस्रजाश्रितमौक्तिका
ललितविलसत्पादा पत्रावलीवलिताङ्गका ।
अतिविकिरती रत्नज्योतिर्मधूनि महारसा
कनकलतिकालोला नित्यस्थलाल्लुलितेव सा ।। ८५ ।।

रोलम्बराजिहरिरत्नकलम्बराज-
त्कंकेलिमञ्जरिमहामणिचापपाणिः ।
कर्णान्तकोमलकटाक्षतरङ्गरम्या
सा शोभते स्म शुचि शुच्यधिदेवतेव ।। ८६ ।।

---

1. पिपुटी इति ख्यातिः ।
2. पत्रपाश्या ललाटिका इत्यमरः ।
   द्वयं ललाटाभरणस्य नाम ।
3. परीतथ्या has been used for पारितथ्या for keeping the metre correct.
4. आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभ इत्यमरः ।
   अतिसयितं सौरभं यस्याम्रस्य स सहकारः ।
5. कणिशं शस्यमञ्जरीत्यमरः ।

राधा शुभाद्वयविभाविभवानुविम्ब-
मादर्शमध्यमिलितं स्वमुदीक्ष्य मेने ।
चेतोभुवः स्फटिकपेटकगर्भसंस्थं
नानाजगज्जयसमाहृतरत्नपुञ्जम् ॥ ८७ ॥

इयं हि परमा रमा न मम पादपातक्षमा
भवेदिति विभावयन्निव विलोक्य तां देवताम् ।
नभोभ्रमभरश्रमादुदधिमप्युदन्वंस्तदा-
चुचुम्ब चरमाचलं सपदि संपतिष्यन्नविः ॥ ८८ ॥

व्योमेभस्य निगीर्णविन्दुपटली विम्बारुणा वारुणी-
वामायाश्चरमाचलोच्चकुचयुक्पत्राङ्कपत्रोत्करः ।
कन्दर्पक्षितिपस्य नूतनतरं पट्टातपत्रं रति-
क्रीडारक्तपतङ्गमो विरुरुचे तुङ्गः पतङ्गः[1] पतन् ॥ ८९ ॥

कौसुम्भचेलचटुलस्यरवाद्यभाण्डं
रत्येककुङ्कुमकरम्बितमणीकरण्डम् ।
अस्ताद्रिमगंभृगुमाल विशालनेत्रं
कांचिद्रुचिं व्यतत तिग्मरुचिर्विचित्रम् ॥ ९० ।

सरिपुरुधिरसारं सारं पितुर्निजमायुधं
त्रिजगदर्जितो जेतुं कामः करोति करे किमु ।
इति मनसि न भ्रान्तिः केषां वभूव विभाविभुं
[2]घुसृणसदृशं दर्शं दर्शं भृशं चरमाचले ॥ ९१ ॥

अस्ताद्रिद्रुततत धातुधारयेव
व्याप्तत्वादरुणमणीमयत्वधीदः ।
यः पट्टस्तवक इव व्यभात्पपात
प्रोड्डीनोऽपरजलधौ स हंसहंसः ॥ ९२ ॥

---

1. पतङ्गःपक्षिसूर्य्ययोः ।
2. जागुडं घुसृणं रक्तं कुङ्कुमं धीरपोतने इति कोषान्तरम् ।

निखिलनयने व्यस्तं कृत्वाशु गन्धपटं स्फुटं
ललितनलिनीप्रेमव्याजात् निलीय गते रवौ ।
हरि हरिति हा याद्दग्याद्दक्तमः पदमाददे
क्रमश उदितं ताद्दक्ताद्दग्रथाङ्गविहङ्गयोः ॥ ६३ ॥

स्वकान्तिकुलकुङ्कुमैर्नवकुसुम्भचूर्णप्रभै—
स्तमो मृगमदद्रवैरपि तमालनिर्यासभैः ।
हरिद्वरवधूप्रसाधनविधानविद्याग्रणी-
रथाकृत पितृप्रसूः कमपि संमदं हारिणी ॥ ६४ ॥

ये येन सर्वजगतीसदसद्व्यवस्था-
व्यालुण्ठनात्करशरेण खरेण खिन्ना ।
आस्तत्र भास्वति न भास्वति ते विसस्रु-
र्ध्वान्ताङ्कुराः कतिपये विदरं दरीभ्यः ॥ ६५ ॥

ध्वान्तं करोतु मलिनं न मलीमसं मां
सोऽयं तथा स्वयमहं सहसा भवेयम् ।
इत्थं विभाव्य किमु वान्धवशोकवह्नि-
दग्धावशेष इव पद्मगणो बभूव ॥ ६६ ॥

हरिहयहरिति द्राक्वापि कान्तिच्छटोच्चै-
रुदयगिरिशिखोद्यद्धातुधारेव रेजे ।
रचितमुदमुदेष्यच्चन्द्रमोऽग्रेसरों यां[1]
प्रति सपदि चकोराश्चक्रिरे गानभद्रम् ॥ ६७ ॥

उद्यद्विद्रुमकन्दलो द्यु जलधेः पूर्वाद्रिदन्तिप्रभो
राजद्गैरिकरागभङ्गुररदो मन्दारचापो हरेः ।

---

1. कान्तिच्छटाम् ।

शकाणा कमनीसकुङ्कुमतमभ्र मञ्जरी मञ्जुला
सन्ध्याभाकलिता ललास शशिनो द्रागेकिका लेखिका ॥ ९८ ॥

कन्दर्पाकलितकुसुम्भचामरं वा
केलत्या विलमदलक्तकपट्टिका वा ।
पूर्वाद्रे विकसदशोकगुच्छको वा
शीतांशुद्रुतमथ दिव्यदीव्यदुच्चैः ॥ ९९ ॥

पुरः खलु पितृप्रसूरुचिभरेण शोणस्ततः
किमूदयदशोकनत्कनककान्तिभिः पिङ्गलः ।
अथो किल समुन्मिलत्कुमुदशोभया पाण्डर-
श्चकार सकलाकरस्तदभिसारभद्रोत्सवम्[1] ॥ १०० ॥

तां यस्मादथ सुमनःशरः शरीर-
व्यूहेनावृतजयवानवाप्तमायः ।
श्रीकृष्णं स्वरससरस्वतःसुधांशुं
निःशङ्कं तदभिससार स रसाक्षी ॥ १०१ ॥

सख्यासमं प्रणयसीधुसरित्प्रणालीं
कन्दर्पदीपपरिदीपिघृतौघधाराम् ।
सा दोहदत्रिदशवल्लिवसन्तलक्ष्मीं
चिन्तामणिं हृदि दधे रसिकस्य चिन्ताम् ॥ १०२ ॥

कृत्वा कर्णरसायनं रसमयं नानावयस्यावचो ।
राधामाधवमाधुरीमधुधुनीमासाद्य माद्यत्तमा ।
केलीकुञ्जकुटीरकोटिकलनात्कन्दर्पदर्पाम्बुधौ
संमग्ना सहसा प्रसादसदनं स्वं सात्विकं संदधे ॥ १०३ ॥

---

1. तस्याः राधिकाया अभिसारे सुरतार्थंगमने भद्रोत्सवं मङ्गलोत्सवम् ।

कृष्णं कुञ्जकुटीरकोटरशुकं संगीतगानश्रिया
शृङ्गारामरवृक्षवीजमुदयत्कामामृतांशूदयम् ।
तद्दृष्टिः प्रणिपीय पीवरतरं केलीकलानाटिका
नार्त्तिक्यं कलयांचकार सृजती भ्रू विभ्रमव्यञ्जकम् ॥ १०४ ॥

पातिव्रत्यसुधासरित्प्रसरभूः श्रीनिम्बदेवीगिरां
जीवातोर्यमजीजनज्जनमतं श्रीमच्छतंजीवतः ।
तेनेराभिरनादिना विरचिता या केलिकल्लोलिनी
तस्यामापदसौ तरङ्ग उदितः पूर्त्तिं चतुर्थाग्रजः ॥ १०५ ॥

श्रीराधाभिसारो नाम ।

चतुर्थस्तरङ्गः

राधां ततः किमपि कामविचित्रचित्रां[1]
संमोहमन्त्रमतयन्त्रमयास्यपद्माम् ।
अक्ष्णा निपीय परिपल्लवयांबभूव
तर्षाङ्कुराणि सुकराणि रसेन कृष्णः ॥ १ ॥

पुलकपटलकैतवात्पपाट स्फुटमिदममी[2]यहृदम्बुजन्महृद्यं ।
न्यविशत शतधा यदत्र राधाप्रकटकटाक्षमधुव्रतः प्रमत्तः ॥ २ ॥

मदनोप्ततमस्य[3] मोदवीजप्रकरस्याङ्कुरबृन्दमुच्चकार ।
पुलकौघमिषेण तस्य लस्यल्ललितोल्लासरसैः कपोलदेशः ॥ ३ ॥

औत्सुक्यामृतलहरीपरीतभावाज्जाड्यं तत्करचरणादि संचचार ।
कामीयं किमु कमनी[4]कलाकलापैरद्वैतं गतमितरेतरं समाधिम् ॥ ४ ॥

सजलजलजविभ्रमं[5] बभार प्रसृतमुदस्रममुष्य वामम्क्षि ।
स्फुरदनिलविलोलपद्मलीलां[6] शुभफलदक्षिणमाप दक्षिणं च[7] ॥ ५ ॥

उल्लोलकङ्कणझणत्कृतिकैतवेन संबोधनं विदधतीं रतिकौतुकाय ।
भ्रूवल्लिवेल्लनमिषाद्धृरिनाटयन्तीं कामं विलोक्य कमनीमयमित्यबोधि[8] ॥ ६ ॥

---

1. Ms. reads ० चित्रं ।
2. Ms. reads ० मिदमीय० ।
3. मदनेन उप्ततमस्य अतिशयेन क्षिप्तस्य हर्षवीजसमूहस्य ।
4. कामाय हितः, तम् । कमनं कामुके कामे इति विश्वः ।
5. जल सहित पद्मस्य विभ्रमं विलासम् ।
6. किं च, दक्षिणं अक्षि, स्फुरतः अनिलविलोलपद्मस्यलीलां आप प्राप्तम् ।
7. दक्षिणमक्षि, कर्तृ. ।
8. कमनी-कामुकां । इति वक्ष्यमाणप्रकारेणाबोधि ज्ञातवान् ॥ कमनी-कामुकां । इति वक्ष्यमाण प्रकारेणाबोधि ज्ञातवान् ।

लसत्यसौ [1]शुचिरसपूरवाहिनो तदच्छति स्मितघनफेनविप्रुषः ।
नवाऽथवा मनसिजमौलिमालिका ततः स्वतः प्रमदमधूनि वर्षति ॥ ७ ॥

एषा विहारगिरिनिर्झरिणी स्मरस्य तद्भाति हारमणिबुद्बुदबृन्दबन्धुः
किं वा जगद्विजयिशस्त्रलताप्रशस्ता तस्मात्प्रसारयति शात[2]कटाक्षकोटिम् ॥ ८ ॥

इयमुदयति कामकामकल्पव्रतति[3]रनोवरसाङ्कुरप्ररोहा ।
विदलदलमिलत्पुटौ ततो भ्रूविलसितदृग्द्वयदम्भतो दधाति ॥ ९ ॥

कान्ता स्मरस्य कनकं जयवैजयन्ती
तद्भ्रूमसीमसृणलेखनिकादलेन ।
श्रीलक्ष्म लक्ष्म समुखे निजनामवर्णं
युग्मं दृगुत्पलयुगच्छलतो लिलेख ॥ १० ॥

इति चिन्तनचित्रसीधुसिन्धौ भ्रमिमज्जत्तममानसो मुकुन्दः ।
मदनस्य जयस्य लग्निकां तां सविधे संमुमुदे मदेन वीक्ष्य ॥ ११ ॥

संसिश्वती सा परितः परीतं[4] हारिद्रहारिद्रवमात्मभाभिः ।
केलीकलाकुञ्जकुटीरमध्यं पद्मेव पद्मान्तरथाविवेश ॥ १२ ॥

राधां तामथ लज्जिता समर्प्य सौम्या गोविन्दे प्रणयरसाङ्कुरैककन्दे ।
तद्यन्त्रं गलतजमण्डनं वितने हारं तन्मयमतिदं प्रसादमेषा ॥ १३ ॥

श्रवदिव नवसात्विकाम्बुदम्भान्मदनरसं वृषभानुनन्दनायाः ।
शयकमलमलं[5]चकार कृष्णो निजकरकोरकमध्यतो[6] विलासी ॥ १४ ॥

औत्सुक्योर्मिभिरभिपातुकैरगाधे संमग्नो मदनरसाम्बुराशिमध्ये ।
गोविन्दो मदमधुमाधुरीधुरीणां श्रीवल्लीममृतमयीमवोधि राधाम् ॥ १५ ॥

---

1. शुचिः शुद्धिमुपहते शृङ्गारापानयोः स्थिते ग्रीष्मे हुतवहेऽपिस्यादुपधा शुद्धमन्त्रिणि ।
2. तीक्ष्णं शात ।
3. वल्ली तु व्रततिर्लता इत्यमरः ।
4. परीतं-व्याप्तम् ।
5. राधायाः करपङ्कजम् ।
6. आत्मीयहस्तकोरकमध्ये ।

दिनकरकरकालकूट[1]तप्तो जन इव नीरधरामृतौघधारां ।
विरहदहनदग्ध[2] आददेऽसौ मुदमधिकामथ[3] राधिकां निषेव्य[4] ॥ १६ ॥

प्रियताजतुजातसंयुतं किं निविडालिङ्गनकैतवादवाप ।
इतरेतरमिष्टकल्पवल्ल्योः[5] फलमित्थं मिथुनं मिथ[6]स्तदुच्चैः ॥ १७ ॥

क्रीडान्तःकलितकलावतीक एष श्रीकृष्णः मुखरसपानपीनतृष्णः ।
संतेने स कनकचूषकस्य[7] कामक्ष्माभर्त्तुर्भटवरवारणस्य लीलाम् ॥ १८ ॥

अञ्जनागिरिविराजिसञ्जनां[8] हेमधामहरितालमालिकां ।
सा निनिन्द कृतनन्दनन्दनालिङ्गनाथ वृषभानुनन्दना ॥ १६ ॥

घनकनकमृणालवल्लिभाजः स्मरकलहंसवरस्य संविलासं ।
निविडभुजनिबद्धराधिकाङ्गो व्रजपुरपल्लवपङ्क्वस्ततान ॥ २० ॥

राधा हिरण्मयकुशेशयगर्भगौरो संश्लिष्य कृष्णकृमिजद्युतिमाशु कृष्णं ।
कामस्य वेशविधिपेशलकेशपाशसौवर्णसूत्रलतिकेति मतिं ससर्ज ॥ २१ ॥

तथा स कान्तः पुलकप्रफुल्लप्रियाङ्गवल्लीवलितो ललास ।
यथा विलासाग्रिमहेमपुष्पमालाञ्चितः श्यामलमल्लिपुञ्जः ॥ २२ ॥

राधिका त्वरितपञ्चसायका नायकाङ्गलतिका विशोभिका ।
सा निनिन्द रविनन्दनीपयःसङ्गिनीं कनककञ्जमञ्जरीम् ॥ २३ ॥

---

1. दिनकरस्य सूर्य्यस्य करः किरणः स एव कालकूटो विषभेदः तेन प्रतप्तः ।
2. विरह एव दहनोऽग्निस्तेन दग्धः संतप्त इत्यर्थः ।
3. मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदा इत्यमरः ।
4. निषेव्य-प्राप्येत्यर्थः ।
5. चिन्तित कल्पलतायाः ।
6. रहसि ।
7. कनकचूषया कनकसम्बन्धिगजकक्षावन्धनरज्जुना सहितस्य ।
   चूषाकक्ष्या वरत्रास्यादित्यमरः ।
8. अञ्जना गिरौ विराजिनी सिञ्जना संसक्तिर्यस्याः ताम् ।

तौ जम्पती रतिरसं किमु मूर्तिमन्तं नो सत्वनीरभरमाश्रयतां नितान्तं ।
किन्तु प्रकान्ततमयोस्तनुकल्पवल्ल्योश्च्योतन्मरन्दभरमेव परस्परस्य ॥ २४ ॥

इतरेतरचुम्बितावधातां पुलकांस्तावमिकौ सकौतुकौ यान् ।
कुसुमेषुकलम्बकेसराणां[1] मतिमातन्वत ते[2] नितान्ततीक्ष्णाः ॥ २५ ॥

कञ्जिन्याः प्रकटितकण्टकाङ्कुरायाः रोमाञ्चप्रचयसमागमात्समाना ।
सा रेमे चिरमविलम्बचुम्बनेन प्रोन्मीलद्रसमधुघूर्णितेन तेन ॥ २६ ॥

कामबाणगणपक्षपक्ष्मभिः सङ्कुलं प्रकटकण्टकच्छलात् ।
नागरी प्रचुरचुम्बचातुरी कान्तमान्तररसं न्यपाययत् ॥ २७ ॥

निंस्यते स्म[3] हरिणा हरिणाक्ष्या गण्डमण्डलमलं पुलकाञ्चि ।
सत्कराङ्कुरकुलं विधुविम्बं चन्द्रकाषरुषभेण यथोच्चैः ॥ २८ ॥

इयमथ कमनो मनीषितं किं किमपि महज्जगदितुं मुहुश्चुचुम्ब ।
निजमुखमुकुलेन कर्णमूलं पुलकमयानुमतिप्रियं प्रियस्य ॥ २९ ॥

हरिवक्त्रमसारसारपात्रे रसिकाचुम्बनचातुरीरसेन ।
पुलकौघमिषान्मनोजपूजानवदुर्वाङ्कुरवार उल्लास ॥ ३० ॥

निशातनोत्नोपलपत्रिलेखाशिखावलिस्त्वं पुलकालिराप ।
प्रचुम्ब्यमाने कमनेन राधाकक्षान्तराले रतिकान्ततूणे ॥ ३१ ॥

चञ्चत्प्रचुम्बचयचञ्चुतया चलाक्ष्या वक्त्राय किं रतिमता मदनेन दत्तं ।
सुश्यामचामरमलंकुरुते स्म कृष्णकक्षातलं पुलकमण्डलकैतवेन ॥ ३२ ॥

---

1. कलम्बमार्गणशरापत्रीरोपइषुर्द्वयोरित्यमरः ।
2. ते पुलकाः ।
3. निंसि चुम्बने कर्मणि लट् ॥

अथ कमनतमौ[1] सविभ्रमौ तौ घनरसवेगमनेकधा दधानौ[2] ।
द्रुततरमितरेतरं न भेदं सुरसरिदम्बुनिधी[3] इवाददाताम् ॥ ३३ ॥

राधिकाऽधरदले रदलेखालेखनीमथ निखाय लिलेख ।
गोकुलेन्दुरवदारणदम्माद्बीजवर्णमसमेषु[4] मनोः किम् ॥ ३४ ॥

अधरेऽथ हरे[5]र्हरेः[6] शरव्ये[7] शितबाणव्रणसंहतिर्विरेजे ।
रतिरङ्गभुवः कुरङ्गनेत्र्याः खरदन्तक्षतिसंततिच्छलेन ॥ ३५ ॥

कृष्णचन्द्ररदराजिराततं राधिकोष्ठदलमाश्वदोदलत् ।
तद्गतं रसभरं वरं किमाकृष्टुमष्टममृतादपि स्फुटम् ॥ ३६ ॥

निशातदन्तक्षतरेखिकाभिर्नूनं पवित्रे रसिकोष्ठपत्रे[8] ।
कान्ता कलाशास्त्रविधानविज्ञा वन्धप्रकारं गणयांचकार ॥ ३७ ॥

रसिकाधरसान्ध्य[9]चन्द्रभित्ताद्रसपीयूषपरम्परां निपीय ।
विरतां न चकार कामतृष्णामथ वृन्दावनचन्द्रचन्द्रकाषः[10] ॥ ३८ ॥

रसिकाभ्रमरी रसिकाधरतो नवशोणपयोरुहतो वहतः ।
सुखसीधुधुनी[11]लहरीमधुरानपिवद्रसपूरमरन्द[12]भरान् ॥ ३९ ॥

कान्तामुखात्काममखार्घपात्राद्गलन्तमत्यन्तशुभं विशुद्धं ।
वृन्दावनेन्दु[13]रसनारविन्ददलेन लोलेन पपौ रसौघम् ॥ ४० ॥

चिरमरमत राधिकारसज्ञा प्रियरसनामृतपल्लवे नवे यत् ।
तदऽवद्दिव खञ्जतां जड़िम्ना वत वत तद्विसरद्रसभ्रमीभिः ॥ ४१ ॥

---

1. कमनतमौ क़मनीयौ ।
2. विभ्रमेण सहितौ । अन्यत्र अम्भोभ्रमादिना सहितौ । निविड़श्रृङ्गारवेगं । अन्यत्र जलवेगम् ।
3. सुरसरिच्च अम्बुनिधिश्च तौ ।
4. कन्दर्पमन्त्रस्य ।
5. कृष्णस्य ।
6. क़न्दर्पस्य ।
7. लक्ष्ये ।
8. कृष्णस्य ओष्ठपत्रे ।
9. राधिकाधरसन्ध्या भवचन्द्रखण्डात् ।
10. चन्द्रकाष इति चकोरस्य संज्ञा ।
11. ह्रदिनीतटिनीधुनीत्यमरः ।
12. मकरन्दो मरन्दश्च पुमान् पुष्परसश्च स इति क़ोषः ।
13. वृन्दावने इन्दुरिवेत्युपमितसमासः ।

स्वयं ब्रह्मरूपावमू ब्रह्ममोदं कथं स्वानुभूतं प्रभूतं विधत्तां ।
इतीवेतरं तं मनोभूविभूत्वे विभाव्यं सुभव्यं दधाते रतोत्कौ ॥ ४२ ॥

राधाया उरसिजमण्डले विशाले कृष्णोऽथ प्रखरनखाङ्कुशं निखाय ।
संतेने तदतनुकुम्भिकुम्भभावं स्वस्यापि स्फुटमुदितां निषादितां च ॥ ४३ ॥

श्रीकृष्णवक्षसि भृशं सहसा रसान्धा राधा न्यधात्कररुहक्षतकैतवेन ।
श्रृङ्गारसागरभवं प्रियताप्रवालवलयङ्कुरं तुलितसान्ध्यसुधांशुलेखम् ॥ ४४ ॥

मन्मथस्य परितः परिसृप्ता चन्द्रखण्डविशिखव्रणलेखा ।
लक्ष्यते स्म कमनीकुचलक्ष्ये कृष्णचन्द्रनखलक्षणलक्ष्यात्[1] ॥ ४५ ॥

आग्नेयास्त्रशिखाशिखा रतिपतेः श्रृङ्गारलीलाकला-
नद्या नूतनकञ्जनीकिशलयं प्रेमैकबीजाङ्कुरम्[2] ।
राधायाः शुकचञ्चुचञ्चनचणाकारा नखाङ्कावली
कान्तस्योन्नतबाहुमूलमिलिता चित्रश्रियं शिश्रिये ॥ ४६ ॥

हरिरथ नखराङ्कुरैः करालैः कमलदृशः कुचकोरकच्छलेन ।
सपदि परिलिलेख सद्मसौधं किमु परिपातुमपूर्वपक्वचूतम् ॥ ४७ ॥

श्रीकृष्णनाभिकमलस्य रसोज्ज्वलस्य संवर्त्तिकावलिविलासमुरीचकार ।
वामभ्रुवः प्रबलिता नखलक्ष्मलेखा लेखाधिपायुधशिखारुचिमुल्लिखन्ती[3] ॥ ४८ ॥

रसिकस्य नखस्य लक्ष्म नाभीसरसीमध्यगतं सुमध्यमायाः ।
मतिमातत लक्ष्यमण्डलान्तःस्फुरितस्य स्मरकिंशुकाशुगस्य ॥ ४९ ॥

राधिकाखरनखक्षतरेखा माधवत्रिवलिवीरुधि रेजे ।
लोहिता समितिसंप्रतिलग्ना कर्त्रिकेव शिवशत्रुभटस्य ॥ ५० ॥

---

1. श्रीकृष्णनखचिह्नव्याजात् ।
2. Ms. reads ०ङ्कुरः ।
3. इन्द्र-लेखानां देवानां अधिप इन्द्रः तस्यायुधं वज्रं तस्य शिखा कोटिः तस्या रुचिं समानयन्ती ॥

अथ मिथुनमिदं मुदम्बुराशौ प्रसदनसान्द्रतरङ्गरिङ्गदक्षं ।
सपदि विरतवाह्यवृत्तिवित्ति मनसिजमन्त्रसमाधिमाधितान्तः ॥ ५१ ॥

निपत्य नीव्या निकटे कमन्या हरेः करः कुट्मलनेन कामं ।
अन्तर्मिलन्मन्मथकाण्डकाण्डं वहुं वहिष्कर्त्तुमिव व्यवास्यत् ॥ ५२ ॥

स्वयं पुलकशूचिभिः शुचिशिखाभिरस्याः श्लथे ।
हरेः कररुहाङ्कुरैः स्फुटनभाजि नोवीतटे ।
अनाहतमपि स्वतः प्रविचचाल चोलं तदा ।
निजाश्रयनतौ भवेत्खलु समुन्नतोऽप्यानतः ॥ ५३ ॥

परिरम्भविजृम्भणभूरिभरादथवा रतनिर्भरवाररयात् ।
मदनैक्यभृतो भृशमेणदृशः स्खलिता विवभावथ काञ्चिलता ॥ ५४ ॥

प्रियतमकरकण्टकः कठोरं स्तनमपि विक्षतमातनोदहं कः ।
इति दरमदरं किमाप्यतन्वाः स्वयमलुलत्कलसप्तकीलताशु[1] ॥ ५५ ॥

रतिसंयतितन्नितम्बविम्बं फलकं यद्भ्रमयांचकार कामः ।
स्वयमेव तदीयगुप्तिजाग्रद्वसनग्रन्थिरभिद्यत द्रुतं तत् ॥ ५६ ॥

हरिकरजकरम्बितं कमन्याः सपुलकपालि वभौ नितम्बविम्बं ।
स्थलमिव नवमेघपुष्पधाराकलिततलं यवसाङ्कुरालिशालि ॥ ५७ ॥

कृष्णचन्द्रकरसंचरणेन प्रोदलासि रसिकोरुयुगेन ।
चित्तजस्य जयकानककेत्वोर्विभ्रमं विदधता भ्रमिभाजा ॥ ५८ ॥

राधा व्यधाज्जघनकम्पननर्त्तनेन नानाकलारतकलामृतगीतकेन ।
सत्काञ्चिकिङ्किणीमणिगणवादनेन तौर्यत्रिकं रतिपतेर्जयमङ्गलाय ॥ ५९ ॥

हरेरथोच्छृङ्खजशृङ्खलस्य घनैः क्वणैः किङ्किणिका निकामं ।
मनोजराजस्य जयोर्जितस्य यातायशो डिण्डिमतामतानीत् ॥ ६० ॥

---

1. स्त्रीकट्यांमेखलाकाञ्चीसप्तकीरसनातथेत्यमरः ।

कटिप्रेङ्खत्काञ्च्या मणिगणरणत्कारकपटा-
त्कलाशास्त्रव्याख्याकृति कृतितयाऽन्योऽन्यमजितम् ।
विभाव्योच्चैर्भावव्रततिमतिसौख्यामृतभरै-
र्विदग्धौ तौ कान्तौ मुहुरतनुतां पल्लवनुताम् ।। ६१ ।।

...ग रसपूर वा पिकोत्था स्मरकेलौ कलहंसिका ध्रुवं सा ।
...लितं रतकूजितं द्रुतं तत्प्रियनर्मप्रियतां मुहुर्निनाय ।। ६२ ।।

...मरं सुरतमञ्जुगुञ्जितं कान्तयोः किल विभाव्य भाववत् ।
...शु भृङ्गमिथुनं मिथः स्पृहं स्वीयजातिरतिविभ्रमं दधे ।। ६३ ।।

...दनकलरवीकलारवत्वं रतिललिताालिविलासगुञ्जितत्वं ।
...शमथ मिथुनस्य तस्य नाना सुरतजमञ्जुलकल्पितं जगाम ।। ६४ ।।

...न्तौ किलैतौ रतिकान्तचापबाणौ ततः सुत्कृतिकैतवेन ।
...ाकृष्टिमोक्षैर्गुणपत्त्रपङ्क्तस्यदस्वनं सान्द्रमवाप मन्द्रम् ।। ६५ ।।

...वृद्धिं सुरतरसाम्बुधिं विलासज्योत्स्नाभिः समभिगमय्य रज्यमानः ।
...च्छिन्दन्नतनुनमश्चिरोत्थमाधाद्राधायाः कमपि मदं स कृष्णचन्द्रः ।। ६६ ।।

...धिकाकरतलान्तलम्बिता कामुकस्य कुतुकात्कचावली
...ादद्रे स्मरनिषङ्गनिःसरत्रीलबाणमयबाणवल्लिताम् ।। ६७ ।।

...तिरमसनिवृत्त... परस्परं नवाद्यैः ।
कालिन्दनीरजरजःकपटात्समीर ।। ६८ ।।
कुञ्जाग्रकम्पकृतकौसुमवृष्टिपुष्टिर्वातस्...

---

1. कालिन्द्या इदं कालिन्दं, कालिन्दं च तन्नीरजं चेति, तत्... समन्तात्, नवारुणरुचा नवीनारुणभासा रुचितं दीप्तिं, अभ्रं मेघ... कुञ्जाग्रे कम्पकृतेन या कौसुमवृष्टिस्तया पुष्टिपुष्टता यस्य, एवं भूतो वा...

कान्तं निपात्य दलतल्पतले ततान
सा पौरुषाणि विपरीतरते रणेऽथ ॥ ७० ॥

निजाश्रयोन्नतिभरतो रतोत्सवेन नर्त्तकिं न मधुरहारमञ्जरी ।
मृगीदृशः स्तनघनवल्गनस्वनच्छलाच्छ्रिता रतिपतिगीतिमुच्छ्रिता ॥ ७१ ॥

गलिता वरवर्णिनोगलान्तात्करकालिङ्गनिहारिहारयाज्ञी ।
रसिकोरसि संनिपत्य रेजे जयशाटीव मनोभवाद्‌वाप्ता ॥ ७२ ॥

एकैकं स्तनतटतो वभौ त्रुटन्ती कान्ताया विचलितचारुमौक्तिकाज्ञी ।
श्रीकृष्णे निधुवनसंख्यसम्मुखोने केलत्या किल विहितेव लाजवृष्टिः ॥ ७३ ॥

प्रियाकुचाद्रिच्युत आचितः प्रिये पराङ्गरागप्रकरः समादित ।
रते रणे पुष्पशरस्य निष्पतत्कलम्बजालस्य परागपूरताम् ॥ ७४ ॥

विसरदधरनागवल्लिरागः कमलदृशो वदनश्रमाम्बुविन्दुः ।
मुरहरमुखनीरजे निपत्य व्यधितपरागपराक्तभृङ्गबुद्धिम् ॥ ७५ ॥

कामः करोति सहसैष सहायतां ते माभैरतान्ततुमुले तरले तदेव ।
इत्युज्जगाद धुवनाभिनयेन[1] राधा नासामणी निजजनस्य जयोत्सुकेव ॥ ७६

श्रुतिमञ्जरियुग्मतो युवत्याः प्रियदृक्पुष्करकोरकाशयेव ।
अवतंसितनोलनीरजन्मभ्रसलत्रिभ्रशतां भृशं विलोलौ ॥ ७७ ॥

ललनाललाटतलघर्‌ ... ५८ ॥
पतिवक्षसि ...कलामृत...गीतकेन ।
...यंत्रिकं रतिपतेर्जयमङ्गलाय ॥ ५६ ॥

...ः क्वणैः किङ्किणिका निकामं ।
...स्य यातायशो डिण्डिमतामतानीत् ॥ ६० ॥

...तकीरसनातथेत्यमरः ।

मिथुनमिदमुदारं वैपरीत्यं परीतं
रतरसरभसोर्म्यामुल्लासाप्लुतं यत् ।
कचकुलमपि तत् किं तत्त्वगं तादृशत्वं
व्यतनुत खलु भावाः स्वाश्रयाभाऽनुभावाः ॥ ८० ॥

ततो नानाबन्धैः सुरतरससम्भोगसुभगौ
वमन्तौ स्वेदाम्भो मिषत उदितस्नेहलहरीम् ।
परिक्लान्तौ कान्तौ ललिततमलीलोर्मितरङ्गौ
त्रिलोक्योच्चैः कामः किमपि कृतकृत्यत्वमगमत् ॥ ८१ ॥

यल्लूनाकुसुमालिकामुकलता यत्केशभृङ्गावली
व्याभिन्नादलितो यदच्छदलका नीलाब्जबाणव्रजः ।
तत्कामः कमनीययोः कमनयोः शृङ्गारयुद्धाम्बुधे—
र्मन्थर्येण चिरं श्रमादिव बरं वाह्ये व्यरंसीत्कियत् ॥ ८२ ॥

अथ मृगदृशं कृष्णोऽदर्शन्मदालसवेल्लना—
ल्लसदपघनां भ्रंसच्चेलां श्रमाम्बुसमाकुलाम् ।
रतरससुधासिन्धोः सद्यः समुद्गतिमागतां
विलुलितदलोद्भिन्नां क्लीन्नां सुरद्रुततीमिव ॥ ८३ ॥

कमन्यथ कटिस्थलाल्ललितबिस्खलच्छृङ्खलं
गलद्भिरलमाकुलैः श्रमजलैर्वलद्वाससम् ।
अमंस्त रसिकं रसामृतभरान्तरादुत्थितं
[illegible]वर भृङ्गै[illegible]कादम्बकम् ॥ ८४ ॥

कालिन्दनीरजरजःकपटात्समन्तादभ्र
कुञ्जाग्रकम्पकृतकौसुमवृष्टिपुष्टिर्वातस्ततो मिथु[illegible]

1. कालिन्द्या इदं कालिन्दं, कालिन्दं च तन्नीरजं चेति, तत् तेषां रजः, [illegible] समन्तात्, नवारुणरुचा नवीनारुणभासा रचितं दीप्तिं, अभ्रं मेघं, वितन्[illegible] कुञ्जाग्रे कम्पकृतेन या कौसुमवृष्टिस्तया पुष्टिपुष्टता यस्य, एवं भूतो वातः पवनः

सद्यः सम्बरभरतः[1] समुत्थितत्वादार्द्रेन्दीवरवरमालिकेव काम्या ।
कान्ताङ्गव्रततिरतो रतश्रमाम्भः क्षीत्राभून्नयनरसायनं प्रियायाः ॥ ८६ ॥

श्रमसलिललवैरलंकृताङ्गीमथकमनीं कमनो निरीक्ष्य मेने ।
रतरसमधुमाधुरीविलासैः सुकुसुमितां कुसुमेषुकीर्त्तिवल्लिम् ॥ ८७ ॥

निरीक्ष्य हरिणेक्षणा हरिमसौ मनोहारिणं
श्रमाम्बुपृषतांकुलैरविरलै[2]र्युतं निर्मलैः ।
रतिप्रियशोमयाब्रवपयः पयोधेः स्फुटं
सुरद्रुममममन्यत प्रततजातमुक्ताफलम् ॥ ८८ ॥

विलासिन्या वक्त्रं ललितललितं वीक्ष्य कमनः
स्मराचार्य्याः कञ्जाकृतिकनकपात्रं कलयताम् ।
तदास्यादुच्चुम्बाच्च्युतवहलताम्बूलपृषतां
मिषाद्बन्धूकानां पदमिदमुदारं यदजनि ॥ ८९ ॥

स्वपदसरसलाक्षालक्ष्मलेखामुदोता—
मुरसि रसिककेतोर्वीक्ष्य कान्तास्मितास्या ।
शुचिरसरसितस्य प्रेमबीजाङ्कुरस्य
भ्रममतिकुतुकोर्म्या मग्नचित्ता ततान ॥ ९० ॥

तन्वाः स्मरेण विपरीतरते नियुद्धे
सांमुख्यतो मुखमुदीतहसैकशाटि ।
वैमुख्यतोऽपि च नितम्बतलं नखाङ्क
लेखार्द्धचन्द्र[3]युतमै
...मङ्गलाय ॥ ५९ ॥

रसिकोरसि कोमलै
समवैत्परम...णिका निकामं ।
...शो डिण्डिमतामतानीत् ॥ ६० ॥

1. ...

2. ...त्यमरः ।

स्वेदाम्बुश्रुतिततिपीड़नं विनेतुं कर्पूरोत्करपरिपूरणं विधाय ।
कामिन्याः कुचकलशेऽङ्कितं नखाङ्कं सोऽगस्त्यप्रसवमिव स्मरस्य चक्रे ॥ ६३ ॥

व्रजवरवधूर्वीक्ष्य स्वीयं नखाङ्कमथो हरे—
रुरसि विसृतैः स्वेदाम्भोमिर्विजृम्भितचन्दनम् ।
निजरतिरसप्रेक्षाचित्राचिराच्चलिताच्युता
मदनशिरसो वक्राकेयाशिखेति अशङ्कत ॥ ६४ ॥

विलुलितमलकाकुलं विलोकय प्रमुदित मीलितनीलकञ्जलोलं
श्रमजलमृजयास्वजन्मुखेन्दोः स मृगदृशः शमशङ्कताङ्कपङ्कम् ॥ ६५ ॥

चुम्बालग्नं ललिततलतो गण्डतः स्वात्प्रियास्ये
कस्तूरीणां मकररचना चित्रचिह्नं विलोक्य
राधा मेने मनसिजमहाकर्मिलेनात्मकर्तुं
स्वीये शिल्पे शशधरमये न्यस्तमेणं निरस्य ॥ ६६ ॥

सरसिजदृशं दर्शं दर्शं चलच्चिकुरोच्चयां
विसिचयकुचां व्यश्चत्काथि सुसंकुचदीक्षणाम् ।
मनसिजमहामल्लानीके श्रमादिव सश्रमा—
मकलयदयं सद्यो लज्जा स्रवन्त्यवगाहिनीम् ॥ ६७ ॥

हृदि व्रीडाजाड्यं किमपि दधती दभ्रविकटा—
त्कटाक्षाकाङ्क्षन्तो शिशिरशयनं विश्रमकृते ।
ततः श्रान्ता कान्ता कमनमणिनीरःसरसिजे
चिरं भृङ्गीभूता कमपि शममापत्सुखमयम् ॥ ६८ ॥

कालिन्दनीरजरजःकपटात्समन्तादभ्रं नवारुणरुचारुचितं वितन्वन् ।
कुञ्जाग्रकम्पकृतकौसुमवृष्टिपुष्टिर्वातस्ततो मिथुनघर्मजलं ममार्ज[1] ॥ ६९ ॥

---

1. कालिन्द्या इदं कालिन्दं, कालिन्दं च तन्नीरजं चेति, तत् तेषां रजः, तस्य कपटात् ।
समन्तात्, नवारुणरुचा नवीनारुणभासा रुचितं दीप्तिं, अभ्रं मेघं, वितन्वन् विस्तारयन्, किं च,
कुञ्जाग्रे कम्पकृतेन या कौसुमवृष्टिस्तया पुष्टिपुष्टता यस्य, एवं भूतो वातः पवनः ।

वक्त्रे वक्त्रमथो भुजे भुजमुरस्युच्चैरुरोजंबयो—
जंघे अङ्घ्रियुगेऽङ्घ्रियुग्ममपि चान्योऽन्यां विभूष्याऽनिशम ।
प्रत्येकं निजमङ्गजालमखिलं रत्नं मुधामण्डनै—
रित्युल्लासितचित्तवृत्तिमिथुनं शर्मामृतोर्म्योऽस्वपत् ॥ १०० ॥

पातिव्रत्यसुधासरित्प्रसरभूः श्रीनिम्बदेवीगिरां
जीवातोर्यमजीजनज्जनमतं श्रीमच्छतं जीवतः ।
तेनेरामिरनादिना विरचिता या केलिकल्लोलिनी
तस्यामेपतरङ्ग आदिततरां पूर्त्ति तृतीयानुजः ॥ १०१ ॥

श्रीराधामाधवसंभोगो नाम ।

पञ्चमस्तरङ्गः

अथ मुरहरो निद्रामुद्रामुदस्य मुदा तदा
सहदयितया दृष्ट्या दातं निशीथनिशाकरम् ।
मनसिजकलाकेलीकुञ्जस्थलाद्रतिवाहिनी
प्रवलकुतुकश्रोतोनुत्तो वभूव वहिर्गतः ॥ १ ॥

कृष्णः करे करमलंकरणं कमन्याः[1]
कृत्वा निपीय[2] नयनेन मुदौत्सुकेन ।
विस्फार्य्यपर्युपरि सम्बरजन्मजाता[3]
संवर्तिकेति[4] कुतुकेन चिचेत[5] चित्रम् ॥ २ ॥

सुरतरसमधूनां निम्नगामध्यमग्नो रसिकउरसि कृत्वा प्रेयसीं प्रेमधाम ।
कनककमलमालामण्डितस्यासमेषोमरकतकृतकेलीकुट्टिमस्यापलीलाम् ॥ ३ ॥

इतरेतरमंसदेशवेल्लद्भुजवल्लीवलितास्यविभ्रमौ तौ ।
कुसुमाशुगशिल्पिसीवनाद्वा सुखसूत्रेण कियद्युतावयाताम् ॥ ४ ॥

मिथुनमिदमथो मुदब्धिमग्नं सुरतरसायनमिन्दुमीक्षते स्म ।
रतिपतिकृतमङ्कनागवल्ली रजतजपात्रमिव स्वदर्शनार्थम् ॥ ५ ॥

अगण्यैर्लावण्यैरवजिततया निर्भरमया-
दिव भ्राम्यन्नभ्रे क्वचन च न लब्ध्वा परिवृतिम् ।
तयोरुद्भाताभ्यां वदनजलजाभ्यां निजदृशां
कटाक्षालीपाश्या [6]विधुरनवधिं वन्धमगमि ॥ ६ ॥

---

1. राधिकायाः ।
2. दृष्ट्वा ।
3. सम्बरजन्मपद्मं तस्माज्जाता ।
4. संवर्त्तिका पद्मपुष्पपत्रं ।
5. ज्ञातवान् ।
6. Ms. reads also बधु० ।

राधा ततः कुतुकितं हृदयं दधाना
कामस्य मोहननुमङ्गल पीठइन्दौ ।
ईत्थं रसाश्रयवचः पयसि प्रियस्य
मग्नां मुदा श्रवण-शस्कुलिकामकार्जीत ।। ७ ।।

श्रीराधे तव नयनश्रिया जितत्वादुत्तरनं[1] भरति यदन्तरङ्कस्कं ।
तन्नूनं गगनवने भयेन तुष्णीं चंक्रम्यां कलयति मन्दमन्दमिन्दुः ।। ८ ।।

गगनगहनमध्य एष मुग्धे तवमुखमञ्जिमलब्धये तपस्यन्
तनुरयति वरं विधुर्विशुद्धिं तदपि कियत्यपि वैभवे कलङ्को ।। ९ ।।

प्रिये रतिरसाय नौ[2] रतिकृता सतारालिपिः
स्थिता परिधिमण्डलीशकुण्डली द्यु स्थले ।
अमुत[3] कुसुमेपुणा[4] किमु सुषोमधामन्छला-
न्यधायि[5] कठिनोमणिर्मधुरमेदुरो मध्यतः ।। १० ।।

सद्योदलत्कदलिकान्तरवल्कलाभः शितद्यु तिः कनति ककतपत्रविम्बः[6] ।
कामेन नः सुरतःवर्णनपद्यरूपामस्यालिपोह[7] किमलेखि कलङ्कलक्ष्यात् ।। ११ ।।

शशिशुभ्रशिलिन्ध्रकोरकोऽरं स्फुरति द्यु स्थलमध्य एष मेध्यः ।
इदमुद्भिदया दधाति चान्तोन्छलितं मृन्छकलं[8] कलङ्कदम्भात् ।। १२ ।।

शिशिरकिरणदम्भादुज्ज्वलं भाति रौप्यं
विषमविशिखरङ्गाजीव[9] सचित्रपात्रम् ।
इहवहलकलङ्कच्छद्मना कज्जलं तद्
विलसति शितिकज्जं मालती मण्डले वा ।। १३ ।।

---

1. पराजितत्वात् ।
2. आवयोः ।
3. शकुन्तकुण्डल्यां ।
4. कामेण ।
5. चन्द्रव्याजात् ।
6. ककतं काकत इति यस्य ख्यातिः ।
7. सुरतवर्णनस्य या पद्यरूपा, श्लोकरूपा, लिपिः अक्षरमालिका ।
8. भित्ति शकलखण्डे वेत्यमरः ।
9. रङ्गाजीवश्चित्रकर इत्यमरः ।

कौतुकेन गगनाङ्गणमध्ये केलती किमिह खेलति लीना ।
साऽङ्कशक्रमणिविक्रयपात्रं सान्द्रचन्द्रदधिमाण्डमुदस्य ॥ १४ ॥

शशधरमिषतो द्योशक्रशालस्थलस्थः
कुसुमविशिखशस्त्रा जीवसाणश्चकास्ति ।
इह वहति विलास लक्ष्मनिस्त्रिंशलक्ष्म्या
त्रिभुवनजयलक्ष्म्याः कलयदक्षः कटाक्षः ॥ १५ ॥

दिवार्दितो दिवसकृतो गभस्तिभिः
पिपासया किल मलिनोऽङ्कनामकः ।
मृगोऽमलाब्धिमकरकुण्डमण्डला-
द्वियद्वने धयति दधोति[1] दोधितिम् ॥ १६ ॥

गगनमदनकोषसद्ममध्ये रसमणिराजतमञ्जुषेव मञ्जुः ।
हिमकरकपटाच्चकास्ति कामं कलितकलङ्कमसारशृङ्खलालिः ॥ १७ ॥

विधुर्वृत्ता वापी स्फटिकतटसंवेष्टिततमा-
द्युदेशे पञ्चेषो रतिललितलोलाप्लवपदम् ।
निरञ्चत्कस्तूरीकुलकलनया कज्जलनिभं
तदन्तः कीलालं कलयति कलङ्कस्य कपटात् ॥ १८ ॥

नभसि सहसोत्क्षिप्योत्क्षिप्योच्चकैरुडुकैतवा-
न्छिशिरकिरणादन्तःसारोच्छलच्छकलच्छदान् ।
तद्वटकुटोक्रोडे क्रीडां करोति चकोरको
मधुमयमहाज्योत्स्नामत्तः कलङ्कमिषात्किमु ॥ १९ ॥

गगने रत्नसङ्गराङ्गणेऽत्र स्मरशोर्षच्युतशीर्षकं किमिन्दुः ।
इह लक्षणलक्ष्यतस्तदास्ते ललितोत्तंसतमालमञ्जरीयम् । २० ॥

---

1. पिबति ।

स्नानस्पृहः कुसुमकार्मुककार्मुकाया
द्रोपोद्धृतः स्फुरति पुष्कर[1]पुष्करिण्याः ।
इन्दूपधेः स्फटिकजः पटपेटकोऽसौ
कौषेयमत्र शिति भाति तदङ्कदम्भात् ॥ २१ ॥

समुदञ्चितचन्द्रिकापयस्कं शशभृन्मण्डलदुग्धकुण्डमुच्चैः ।
असिताश्ममथाकलङ्कलदयात्कुतुकान्मन्थति मन्थरं रतिः किम् ॥ २२ ॥

केलत्या गगनमहानसस्य[2] मध्ये
शीतांशुरजतरुजीष[3]मुज्ज्वलास्ति ।
उन्मीलद्घनतमकौमुदी घृतौघे
भात्यङ्कासितमणिकम्बिका[4] तदत्र ॥ २३ ॥

हयभ्रमिरयाच्च्युतं[5] योग्ययोग्यास्थले
कलङ्कतरवारिसंयुततरान्तरालं ज्वलम् ।
इदं मदनसादिनः[6] किल विराजते राजतं
महाफलकमण्डलं[7] शशिमिषादलं मञ्जुलम् ॥ २४ ॥

शीतांशुर्वलयितकेतकच्छदाभः
केलत्याः स्फटिकपटीरपेटकोऽस्ति ।
तन्नूनं तरलसुधामनोज्ञधाम
श्रीखण्डद्रवनिवहो वहत्यमुष्मात् ॥ २५ ॥

उद्धृत्य तारकमहाकरकौत्करेभ्यः
पिण्डीकृतः कुतुकिना किल मन्मथेन ।
चन्द्रच्छलाद्भ्रियति चञ्चति सारभागः
सचन्द्रिकाद्रवभरप्रकरप्रसारः ॥ २६ ॥

---

1. व्योमपुष्करमम्बरमित्यमरः ।
2. पाकस्थान महानसे इत्यमरः ।
3. रुजीषं पिष्टपचनमित्यमरः । तेलाउणी इति ।
4. दर्वीः कम्बी खजाकाचेत्यमरः चट्ठु इति ।
5. गगन ।
6. अश्वारोहास्तु सादिन इत्यमरः । शिपाई इति ।
7. फलकोऽस्त्रीफलं चर्मेत्यमरः । ढाल इति ।

हरिमणिसुषमस्य व्योमदेवद्रुमस्य
स्फुरति शिशिरकान्तः सान्द्रथभागच्छगुच्छः ।
प्रवलितजवजीवं जीवभृङ्गावलीतद्व्यरचि
रुचिमधूर्म्या तूर्णमेने न तृप्ता ॥ २७ ॥

विषमविशिखत्वष्टात्वष्टं सुवर्त्तुलताकृते
रचयति चिरं चन्द्रव्याजादुगजद्विजविष्टरम् ।
कलयति ततो मध्येटङ्कं कलङ्कमिषादिदं
स्खलयतितरां तारादम्भान्निजाच्छकलानि च ॥ २८ ॥

चन्द्रं चन्द्रमणीनिभं निजयशः पृथ्वीजवीजं स्मरो-
द्यूद्याने परिवेशमौक्तिकमयावापेवपत्यद्भुतम् ।
तस्माद्यश्च्यति चित्रमत्र तरलं ज्योत्स्नाङ्कुराणां कुलं
नूनं हेतुगुणेन गौरमुदयत्ताराच्छसारच्छदम् ॥ २९ ॥

यदुत्पाट्योत्पाट्य स्फुटकुमुदषण्डा दशकलै-
र्दलैः सारैः क्लुप्तः कुटुककृतिनेन्दुः स्मृतिभुवा ।
तदेवायं शीतः प्रविलसति तत्प्रेमसमयं
प्रधत्ते चान्वेति स्वकमभिजनं येन जनता ॥ ३० ॥

वहिरतिशुचिरन्तर्मेचकः पट्टपुष्प-
स्तवक इव कलङ्कस्निग्धमध्यः सुधांशुः ।
रतिपतिजलकेलीकौतुकार्हे विहायः ।
सरसि सदलिफुल्लत्कैरवत्वं करोति ॥ ३१ ॥

उत्पाट्योत्पाट्यसारैर्बिमलतमदलैः स्वर्नदीशुभ्रकञ्जा-
त्क्लुप्तः कामेन काम्ये हरिपदनलिनोपत्रशय्यातलेऽत्र ।
स्यूतत्विड्वैशसूत्रः स्फुरति शशिमिषाच्चारुगण्डोपवर्हो[1]
रत्या रत्या विमर्दात्तदिह विगलितं लक्ष्मकर्णासिताब्जम् ॥ ३२ ॥

---

1. उपधानं तूपवर्हं इत्यमरः, मुचुला इति ख्यातिः ।

लोलाकम्प्रान्मदनकरतो विच्युतो द्योतते द्यो-
रङ्गस्थाने[1] शशधरमिषादुज्ज्वलः कांस्यतालः ।
एतस्यान्तर्मरकतरुची राजते रश्मिरज्जू-
न्नद्धो लक्ष्मच्छलत उदितः श्यामलः पट्टगुच्छः ॥ ३३ ॥

सौम्याङ्कसोमकपटात्परिवेशदूष्ये[2]
मध्यस्थितं तरलतारकभुम्पकाग्रे ।
अन्तः सनीलिपवर्हिर्वहुशुभ्रभाग-
मुल्लोचमण्डलमिदं मदनस्य भाति ॥ ३४ ॥

स्मरस्य रजनीश्वरः समधुपर्ककंसः स्फुटं
परिस्फुरति नूतनः परिधिराजताधारभाक् ।
कलङ्कदलकैतवाद्वहति पाककृष्णीकृतं
य एष तल आचितं वहलचेतकीविद्रवम् ॥ ३५ ॥

तारेश्वरः[3] स्फुरति दर्पकदर्पणोऽयं
व्योमाङ्गणे परिधिसंपुटगर्भसङ्गी ।
सौत्सुक्यवीक्षणरतोक्षणभृङ्ग उच्चै-
रङ्कच्छलाद्विलसति प्रतिविम्बितोऽत्र ॥ ३६ ॥

शीतांशुर्लसति नभोऽर्चनागृहान्तः
कामस्य स्फटिकसरूपरूप्यघण्टा ।
तन्नीलोपलमयवादनीय कीलो
व्युद्भाति स्फुटमिह लाञ्छनच्छलेन ॥ ३७ ॥

---

1. रङ्गो नृत्यस्य भूमौ स्याद्रङ्गो रागे रणस्थले इति विश्वः ।
2. स्थूलं पट्टगृहं दूष्यं पटकापट्टकुड्यपि, त्रिषु दूष्यं दूषणीये क्लीवे वस्त्रगृहान्तरे इति सुभूतिः । दूष्याद्यं वस्त्रवेश्मनीत्यमरः ।
3. चन्द्रः ।

सोऽसौ शशो लसति दर्पकदैवतस्य
कञ्जाकृतिस्फटिक[1]विस्फुटधूपपात्रम् ।
माङ्गल्यमाङ्गलिकधूमततिस्तदेनं
नाऽलं कलङ्ककपटात्किमतं करोति ॥ ३८ ॥

क्रोधक्रूरिमभीमभीमविमतिं माष्टुं तपस्कुर्वतः
कन्दर्पस्य करीन्द्रदन्तकरको व्योमस्थलस्थण्डिले ।
चित्रं चन्द्रमिषेण चञ्चतितरामुच्चैः कलङ्कच्छला-
दस्मिंस्तद्गवलापिधानपुटिका संघट्टिका शोभते ॥ ३९ ॥

व्योमश्यामलमणिपात्रमध्यसंस्थापर्यन्तोल्लसदुडुखण्डपिण्डपुञ्जा ।
सत्सण्डोरतिरचिता प्रियाय चित्ते नो केषां दिशति शशिच्छलेन तर्षम् ॥ ४० ॥

द्राक्स्ताराकुसुमोत्कराद्विगलितैर्ज्योत्स्नाभिषादाचितं
शुभ्रैरेणुभिरुद्विभाति शशभृद्व्योमद्रुमोद्यत्फलम् ।
किं चामुत्र तनोति नेत्रयुगलीलोलां कलङ्कच्छला-
दालग्नं परिवेष्टनेन परितः किञ्चिद्दलं श्यामजम् ॥ ४१ ॥

श्रीमानेष सुधांशुरन्धतमसैरन्धीकृतानां दृशा-
मुन्मेषं विदधाति दीधितिसुधासिद्धौषधीविद्रवैः ।
ताराशैवलनूनजालशबले व्योमाम्बुधौ वीचिभि-
र्व्यावृत्ता विशवल्लरीव निविडावर्त्तेन वृत्तीकृता ॥ ४२ ॥

सूर्योचिः शिशिरांशुरेष निखिलच्छायाच्छलादुच्छल-
ज्ज्योत्स्नावीचिभिरङ्कपङ्कपटलं धौत्वा क्षितौ विक्षरन् ।
रम्याः कौसुमपात्रमण्डलमिति स्वं निह्नुवानः स्वयं
नूनं त्वद्वदनस्य कान्तिविजितः सख्यं समाकाङ्क्षति ॥ ४३ ॥

---

1. Ms. reads स्फटित also ।

केलत्या दयितस्य दैवतवर[1]स्याकाशनीलोपल-
प्रासादस्य शिरःस्थहीरघटतामाप्नोति[2] शीतद्युतिः ।
किं चात्र प्रतनोति नेत्रकुतुकं चित्रं कलङ्कच्छला-
दुन्मीलन्नवनीजनीरजनिभं[3] लीनं पताकादलम् ॥ ४४ ॥

चन्द्रः सान्द्रमयं दधाति कवलोच्चञ्चच्चकोरावली
चञ्चूशूचिचयेन किं निखननादङ्कच्छलाद्रोकखम्[4] ।
किं वा कामशिलीमुखैरभिमुखैर्लक्षीकृतत्वाच्चिरा-
दुद्वेधादथवोदयादिशिखरैरुत्कीर्णभावात् खरैः ॥ ४५ ॥

एष प्लेषविचक्षणो विरहिणां पङ्केरुहाणामिव
प्रेयस्याश्रयिणां प्रियस्मितगुरुः सौगन्धिकानामिव[5] ।
केलत्या सहपायिनो रसकलाकल्यस्य चेतोभुवः
शृङ्गारामरणाखिनः सुखफलप्रस्वादपात्रं शशी ॥ ४६ ॥

इन्दुः कोककुलस्य शोकलहरीजातस्वनाध्यापना-
पूर्वाचार्यशिरोमणिर्विरहिणीगर्वाद्रयपूर्वाशनिः ।
उच्चैर्दृष्टिचयस्य हृष्टिलतिकाबीजस्थलीमण्डली
कामक्रीडितकौतुकामृतयुषां जीवातुरुद्भात्यसौ ॥ ४७ ॥

नानादिङ्मयमालतीलतिकया नो वाकयेन्दोः करैः
सद्यः पुष्पिततातातास्मरयशोनालोकनालाभया ।
आकाशाम्बुधिनाऽपि नापि सहसा किं वा सुधाम्ना सुधा-
पिण्डीपाण्डरपुण्डरीकयुतता सर्वत्र सम्भाविता ॥ ४८ ॥

---

1. केलत्या रतिपतेः देवता एव दैवतं स्वार्थे टण् । तदेव वरः, केलत्या दयित एव दैवतवर इति व्यस्तरूपकम् ।
2. नीलोपलेन मरकतेन घटितः प्रासादः सः । आकाश एव नीलोपलप्रासादः, तस्य शिरोभागस्थित हीरघटित-कलशभावं प्राप्नोति ।
3. उन्मीलतः नवीननीलवर्णपद्मस्य सदृशं यस्य ।
4. छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिरित्यमरः ।
5. सौगन्धिकं तु कह्लारं हल्लकं रक्तसिन्धुकम् ।

नक्षत्राण्डजमण्डलाकुलतलः शीतांशुफेनोल्लस-
[1]त्कूर्मोदञ्चनचञ्चितः प्रवलितज्योत्स्नातरङ्गान्तरः ।
स्फारस्फाविचकोरनीलजलजः सर्वत्र चित्रीयते
चेतोभूजलकेलिकौतुककृते धात्रा कृतः खाम्बुधिः ॥ ४९ ॥

शीतांशोः करसंकरम्बिततया सोल्लासहासश्रिया
श्रीमत्कामयशोमयेन कुमुदस्तोमेन संमण्डिता ।
एषा सूरसुताविपद्विजयभागङ्गापि गङ्गायते
क्वापि क्वापि च लोलकैरवकुलैर्धत्ते द्विरुक्तां द्युतिः ॥ ५० ॥

एषा तुङ्गतरङ्गसङ्गततमा ज्योत्स्नावलीवेल्लिता
हंसैर्मञ्जुमृणालमञ्जरिधिया प्रोन्मर्दिता चञ्चुभिः ।
रुप्यद्रावपरं परेव परितः पूर्णार्कजां जह्नुजा
वैदग्धीं दधतीं तनोति नितरामाश्चर्य्यमेतन्महत् ॥ ५१ ॥

ज्योत्स्नासंततिभिः समाचिततया कैलाशशैलाकृतेः
श्रीगोवर्द्धनभूधरस्य विसृतैर्दूराद्दरीगह्वरात् ।
स्विद्यच्चन्द्रमणिस्थलीभरकुलैः कूलंकषोच्छृङ्खलै-
रत्राप्यर्कसुता नितान्तमयते गङ्गाङ्गसङ्गश्रियम् ॥ ५२ ॥

कन्दर्पस्य विशुद्धसिद्धिगुटिका तन्नाटिकायाः सदा
सौभाग्यौषधिसंपुटी त्रिजगतीसंमोदचिन्तामणिः ।
यामिन्या हरिणीदृशो द्युशयने रत्यन्तरे तृप्यत-
स्तारा हारतरस्य हीरतरलस्त्वां प्रीणयेच्चन्द्रमा[2] ॥ ५३ ॥

संपूर्य कर्णकलशीं कुतुकात्प्रियस्य
वाणीप्रवाहनिवहेन सुखावहेन ।
तस्य प्रतृप्य मधुरस्य रसस्य राधा
स्वाशंसनं शशिनि दृष्टिमयं ततान ॥ ५४ ॥

---

1. त्कुर्मो० in the Ms.
2. चन्द्रमाः in the Ms.

परविरहपिशाचनाटिताहं
सपरिभवं यदपावदे भवन्तं ।
शिशिरकरसुरत्नमस्वमेत-
दुद्गतमिद मेन्दुमथोन्य वीविदत्सा ॥ ५५ ॥

इति भ्रामं भ्रामं मदनमदमत्तौ प्रियतमौ
निकुञ्जे चन्द्रांशुप्रकरपुनरुक्तोरुकुसुमे ।
स्वकेलिस्वर्वल्ल्या सुरससुरभीणां रतसुख-
प्रसूनानां नानाफलमचिनुतां तोषमसमम् ॥ ५६ ॥

अथ तरणिजातीरे कुञ्जाद्विचित्य परस्परं
कुसुमविसरं संवर्षन्तौ प्रियौ मदनोन्मदौ ।
समकलयतां प्रालेयाश्रुस्फुरत्कुमुदेक्षणां
रविपरिभवाशङ्कातङ्कान्निशामभिसारिकाम् ॥ ५७ ॥

यथा यथाऽहसदथ राधिकाननं
तथा तथा शशिनि भियाऽस्तमृच्छति[1] ।
दधुर्मुखं वत तमसा मलीमसं
दिगङ्गना[2] अदितपतिव्रताव्रताः[3] ॥ ५८ ।

सपदि चरमभूमिभृत्प्रपातात्प्रपाताद्
व्रणित[4] इव निजाभाशोणितैः शोणिताङ्गः ।
न्यपतदपरसिन्धौ[5] संदधद्धल्लकत्वं[6]
क्षणमथ विधुरार्त्तिं किं नु सोढुं न शक्तः ॥ ५९ ॥

---

1. गच्छति सति ।
2. दिगङ्गना कर्त्र्यः ।
3. अदितं अखण्डितं पतिव्रताव्रतं याभिः ।
4. संजात व्रणः ।
5. पश्चिमसमुद्रे ।
6. हल्लकं रक्तसिन्धूकमित्यमरः । रक्तशिउली इति ख्यातिः ।

राधाकृष्णौ स्वनित्यस्थलरतकलया नित्यशोऽप्येकरूपौ
संनिर्मायाथ मायाद्भुतगतिविभवात्स्वप्रतिच्छायमूर्त्तिम् ।
सव्याजं वाह्यवृत्तिं कलयितुमतुलां शिश्रियाते पृथक्त्वं
किं विश्वाद्यौस्तयोस्तद्विलसति हि तथा सेन्द्रजालोऽपि लोकः ॥ ६० ॥

कृष्णस्ततः प्रियवयस्यचयं रहस्य-
वाणी मधूनि विनिपाय्य ययौ स्वसद्म ।
गोष्ठे किल स्थितमियत्समयं नृशंस-
संत्रस्त गोकुल इति छलितात्मलोकः ॥ ६१ ॥

लोकत्रयीविजयिनो मकरध्वजस्य
खेडाश्रमप्रदमथोषसि शङ्खशब्दम् ।
श्रुत्वा प्रियं प्रतिपदे ललितासमेता
राधा न्यधात्तरणिजातटवर्मदेशे ॥ ६२ ॥

संभोगस्मरणरसं स्मरार्द्रचित्तं
सीत्कारैः पुलककरैः प्रकाशयन्तीम् ।
प्रातः श्रीभणितिमिषादिति स्ववाणी-
वैदग्ध्यं धुरि ललिता व्यवीवृधत्ताम् ॥ ६३ ॥

गतवति वत चन्द्रे वारुणी[1]ध्वान्तदम्भा-
त्त्यजति कलुषकोष्णं हन्त निःश्वासधूमम् ।
उदयगिरिदरीस्थेऽप्यात्मनाथे नलिन्या
विरतविरहवह्न्यङ्गारवन्निःसृतोऽलिः ॥ ६४ ॥

प्रभाकरकरीश्वरे कलितपूर्वशैलोदरे
करं किरति दूरतः स्फुरितमभ्रपद्माकरे ।
महोडुवकशावकाः सपदि संत्रसन्तो भृशं
द्रुतं दधत एकदा वत तिरोहितिं सर्वतः ॥ ६५ ॥

---

1. वारुणी प्रतीचीसुरयोरपि ।

अरुणमरुणं मूर्त्तैं रागैरिव प्रणिधिं रवे-
र्वनरुहवनी दृष्ट्वा स्पृष्ट्वा मरन्दमुदश्रुभिः ।
अलिकलरवैरुच्चैःकारं करोति मुखोद्गतै-
र्मुखरितगिरा हंस्या सख्या सहैव निवेदनम् ॥ ६६ ॥

बलारातेरन्तः[1]सदनसरसः कोकनदतां
दधानानां नानादिनकरकराणामुपकृतिः ।
बहिष्कारादेषामलिकुलमिषान्मोहतमसां
सजातित्वान्नूनं नलिनवनवीथौ विलसति ॥ ६७ ॥

सहदयितया पीत्वा सीधुं स्मरेण किमुज्झितं
मधुमधुरसोच्छिष्टस्पृष्टं सदल्यसितोत्पलम् ।
कमलमुकुलव्याजाच्चञ्चन्मणोचषकं स्फुटं
द्युतिपतिरहो मोहान्नूनं करोति करोदितम् ॥ ६८ ॥

चूडारक्तजपाद्वयादिव नदैः पादायुधास्तन्वते[2]
स्तोत्रं भानुविभा विभाव्य हरिदिग्भित्तेर्जतुत्वं गताः ।
कोकाश्चानुवते प्रियाभिरभिकाः काकाश्च रक्तोदधि
श्रौतो भ्रान्तिभृतो जवात्पटुरवाभ्कम्पं मुहुर्बिभ्रति ॥ ६९ ॥

सपदि विकचगुच्छस्वच्छबन्धूकवन्या
समुदयमुदयस्याधित्यकायां दधाति ।
इति मनसि न केषां भ्रान्तिरुद्भाति दृष्ट्वा
दिनकरकिरणौघं शोणपिष्टातशोभम् ॥ ७० ॥

उद्दामबन्धुरसुरेश्वरसिन्धुरस्य
सिन्दूरसान्द्रकटघर्षणशोणशोभा ।
प्रातर्धराधरतटीति मतिं तनोति
माञ्जिष्ठमञ्जुतरभास्करभावलीयम् ॥ ७१ ॥

---

1. बलारातेः शचीपतेः । 2. कुक्कुटश्चरणायुधः ।

खदिरजरसताम्र· सान्द्रताम्बूलफेला[1]-
कणगण इव वातोद्धात उच्चैः सुरीणाम् ।
उदयगिरिशिखाया गैरिकक्षोदघोदः
प्रसरति खरशोचीरोचिरोघो नभोऽन्तः ॥ ७२ ॥

प्राचीवधूवपुषि भानुविभावली या
पत्राङ्कपत्रविततिभ्रममातनोति ।
एतां नितान्तमुदितामुदयाचलस्य
शोणोपलस्थलमयूखलतामवैमि ॥ ७३ ॥

अधृत निशि यल्लेशभ्रान्त्या समुज्ज्वलद्दिज्जल-
प्रसवनिवहं दृष्ट्वा हृष्टिं यमीपुलिनेषु यः ।
नियतमिहतां साक्षात्कृत्य प्रभाधिपदीधितिं
स कथमधुना कोकः शङ्कां जहातु न साङ्गनः[2] ॥ ७४ ॥

सूर्यात्मजाजलकुलं नवभानुमानु-
संरञ्जितं विजितरोहित[3]रोहिमेघम् ।
सिन्दूररेणुविसरप्रचुरप्रसक्त-
कस्तूरिकाद्रवचयश्रियमातनोति ॥ ७५ ॥

कलिन्दजातटजनिकुञ्जसंतति-
र्दलान्तराहितरविकान्तिकैतवात् ।
स्फुटं जवास्तबकचयं प्रसूयते
मुहुर्मुहुर्द्रुतमिदमद्भुतं महत् ॥ ७६ ॥

नव्यार्कद्युतियुतयामुनाम्बुचित्रं
वक्त्रान्तप्र × × × × ×[4] पुण्डरीकम् ।

---

1. फेला भुक्तसमुज्झिते इति कोषः, पानपिक इति ।
2. अङ्गनया सह वर्त्तमानः साङ्गनः ।
3. इन्द्रायुधं शक्रधनुस्तदेव ऋजुरोहितम् ।
4. Ms. omits the words

चक्राङ्गं विनमति वीक्ष्य चक्रिचक्रं
दष्टोद्यत्फणफणिवर्हिणभ्रमेण ॥ ७७ ॥

यथा पुरा विदलति कैरवे नवे
वियोगभाग्विदलनमाददे शुचा ।
तथाधुना विहसति सारसे मुदा
प्रियाश्रितो विहसति कोककामुकः ॥ ७८ ॥

यमीजलसमुज्ज्वलं जलजजालमुज्जृम्भते
नवार्करुचिरञ्जितं दधदविन्धनाग्नीन्धनम् ।
परागकुलपिङ्गलीकृतमिहालिजालं किल
स्फुलिङ्गनिचयश्रियं श्रयति शीघ्रमुद्धोद्गतम् ॥ ७९ ॥

प्रविश्याम्भोजस्यान्तरमथ बहिर्गच्छति बहु-
प्रमोदोत्सिक्ताङ्गस्तरुणतरणित्विट्कणगणः ।
इति भ्रान्तिः केषां न भवति विलोक्यालिनिकरं
रजोराजीरक्तं स्फुटकमलकोशान्तरुदितम् ॥ ८० ॥

समुन्मिलति नीरजं विनिमिलत्यथो कैरवं
तदेव जनमाश्वसीरहह संपदि व्यापदि ।
इतीव विनिवेदनं सहितवेदनं कुर्वते
चिरं प्रचुरझंक्रियाप्रकरकैतवेनालयः ॥ ८१ ॥

सुललितदलनीलचेललग्नं
　　सुरभिरजो विसरं परिक्षरन्तीम् ।
कुमुदवदनमानतं वहन्तीं न
　　कुमुदिनीं मलिनोमलिः प्रयाति ॥ ८२ ॥

अप्याश्रिताः कुमुदिनीं विपदि त्यजन्ति
ये ये च नैशनलिनीं[1] मलिनीमपीयुः ।
ते चोभये मधुकरा दुरितेन तेन
युक्तं मलिमसतया प्रथिता भवन्ति ॥ ८३ ॥

कुमुद्वतीक्रोडतले रसाकुले
प्रयाप्य रात्रिं चकितानुपस्थितान् ।
विलोक्य धीरा भ्रमरान्मृदुस्मितं
दधाति पद्मास्यमुदश्चि पद्मिनी ॥ ८४ ॥

कमलमुकुलपेशीसंपुटान्तर्विचिन्वन्
समुददयलिदम्भादेणनाभेः पृषन्ति ।
प्रिय इव हृदि कुर्वन् कण्टकान् कामिनीनां
दिशि दिशि पृषदश्वो लिम्पतो वा मृतोर्मिम् ॥ ८५ ॥

प्रभातमरुता सृतापटलिता समन्तादियं
सरोजरजसां ततिर्वियति भाति भृङ्गान्विता ।
हरिन्मणियुता हिरण्मयविहारखट्वा किमु
स्मरस्य वनिता वने परिजनेन संवाहिता ॥ ८६ ॥

उच्चैः सदागति गतिप्रसरैः समन्ता-
दावृत्त इन्दुसितकेतकरेणुराशिः ।
भृङ्गालिसंगततया तनुते नभोऽब्धौ
शैवालवल्लिविलसन्नवसैकतत्वम् ॥ ८७ ॥

प्राक्शैलारुणघृणिधातुमञ्झरेण
स्नानत्वादिव दिवसादितो विशुद्धाः ।
प्राप्योच्चैर्दिनमणिमण्डनं मनोज्ञं
विस्पष्टाः सहविदिशो दिशो विभाति ॥ ८८ ॥

1. निशायां भवा नैशा, नैशा चासौ नलिनी चेति । नैशनलिनि ताम् ।

पूर्वं प्रदर्श्य जनतां सदिमानमाशु
गाढं महोमहदथ प्रतिभापयिष्यन् ।
सर्वं स्वपादतलसंकुलतां प्रयाप्य
भास्वान् समेति समयादुदयं क्रमेण ॥ ८९ ॥

नवदलकुलक्लृप्तं त्वत्पदाम्भोजपीठं
तुलयति सखि हंसः पूर्वशैलावतंसः ।
तरुणमरुणरत्नैर्निर्मितं केलिकञ्जं
हरिहय[1]हरिणाक्ष्या हस्तमुक्तं किमभ्रे ॥ ९० ॥

समुद्वर्त्त्य स्वाङ्काद्धरिवनितया कौतुकितया
नभः पिण्डीकृत्य प्रहितमिव पत्राङ्कपटलम् ।
इदं प्राचीमूलोन्मिज्जितममलं कोमलतरं
त्विषां भर्त्तुर्बिम्बं विलसति भृशं बिम्बसदृशाम् । ९१ ॥

इदं मिहिरमण्डलं हरिहयस्य पूर्वाचल-
ध्रुवाट्टवरशेखरः स्फुरति शोणरत्नो घटः ।
तदत्र करधारिकात्रितयवैजयन्ती त्रयं
दृशं वितनुतेतरां कुतुककान्तलीलोत्तराम् ॥ ९२ ॥

मन्दाकिनीकनकपङ्कजकाननस्य
छायाभरैर्विसृमरैः कपिशीकृतः किम् ।
एष क्षणं त्रिजगदीक्षणमंशुमाली
स्वर्णातपत्रमिव भाति सुरेश्वरस्य ॥ ९३ ॥

एकीभूतं संभृततेजः श्रुतिवर्ण-
व्रातं नूनं शब्दगुणत्वेन समेतम् ।
साक्षात्कारं धारयति द्यौः खरधाम्नो
दम्भादस्यान्यर्थमितस्याभ्रमणित्वम् ॥ ९४ ॥

1. जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः । शच्या इत्यर्थः ।

स्फुरति मिहिरधाम्ना तुङ्गमालङ्घ्यमानं
रुचिरतरमनीचैरन्तरालं द्युभूम्योः।
प्रियसखि तव कृष्णस्पर्द्धया वर्द्धमान-
श्चिरतरगुरुरागाम्भोनिधिः किं विसृतः[1] ॥ ९५ ॥

अज्ञानार्णववाड़वादसुमतामारोग्यवैद्यात्तमः
कालव्यालविदष्टपिष्टपदृशां सिद्धौषधीसंपुटात्।
ब्रह्मज्ञाननिकेतनान्निजमहः किञ्जल्ककञ्जादतो
दीप्तांशोर्नयनाम्बुजं सखि तव प्रोत्फुल्लमुल्लस्यतात्॥ ९६ ॥

इति मधुरिमकन्दं वाङ्मरन्दं पिबन्ती
क्षणमथ ललितां सा प्रत्यवोचद्विचार्य्य।
सखि चिरतरमासीदत्र कालातिपातो
गुरुजनभयवट्या वेष्टिता किं करोमि ॥ ९७ ॥

अये मा भैः शोभैकसदनसदानन्दरसिके
मयोपायेऽमुष्मिन्ननिशमनपायो भवतु ते।
इति प्रोच्य प्रेमप्रवणगुणगम्भीरिमपदं
ततः सा तां शान्तां व्यतत ललिता भीतिरहिताम्॥ ९८ ॥

पूर्वेद्युः कलिले कलिन्दतनयानीरे निमग्ना मुधा
राधा जीवितसंशयं गतवती भाग्येन वो जीवति।
श्रित्वेयं मम मन्दिरं चिरतरं हे बान्धवा वोऽधुना
प्राप्तेति छलमाकलय्य ललिता तत्सद्मतां प्रापयत्। ९९ ॥

श्रुत्वेत्थं किम्वदन्तीं मुररिपुरपि स स्वैर्वयस्यैः सहेत्वा
दृष्ट्वा राधामगाधाशयमथ ललितां स्नापयित्वा स्मितोर्म्या।
तां कान्तां भावमात्रा किमिति किमिति च प्रश्नदम्भेन तूर्णं
कर्णान्ते चारुचुम्बन्निभृतमतिभृतं विश्वभद्रं विधत्ताम्॥ १०० ॥

1. सृप्त यतो।

पातिव्रत्यसुधासरित्प्रसरभूः श्रीनिम्बदेवी गिरां
जीवातोर्यमजीजनज्जनमतं श्रीमत्छतंजीवतः ।
तेनेरामिरनादिना विरचिता या केलिकल्लोलिनी
तस्याः पूर्त्तिमयं तरङ्ग उदयद्भङ्गिर्व्यधात्पञ्चमः ॥ १०१ ॥

च्छलितवन्धुवर्गो नाम ॥

श्री ॥

समाप्तम्

———

श्लोकानुक्रमणिका